

शिक्षा-मन्त्रालयः
MINISTRY OF EDUCATION

सत्यमेव जयते

# राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानम्

**Sanskrit-संस्कृतम्**

*राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य मार्गदर्शकालेखः, २०२३*

**अनुच्छेदः ५.२०, राष्ट्रिय-शिक्षा-नीतिः २०२०**

राष्ट्रियशिक्षक-शिक्षापरिषदा (NCTE) राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य (NPST) एकसार्वजनीनमार्गदर्शकस्य विकाशो भाविष्यते २०२० तमे वर्षमध्ये, यस्य पुनःसंरचना भविष्यति निपुण-मानदण्ड-निर्धारण-निकाय- (PSSB) रूपेण सामान्य-शिक्षा-परिषदः (GEC) तत्त्वावधाने, सा च संरचना राष्ट्रिय-शैक्षिकानुसंधानस्य प्रशिक्षणस्य च परिषदा (NCERT), राज्य-शैक्षिकानुसंधानस्य प्रशिक्षणस्य च परिषदा (SCERT), सर्वस्तरस्य सर्वक्षेत्रस्य च शिक्षकैः, शिक्षकसज्जीकरणस्य विकाशस्य च विशेषसंगोष्ठिभिः, वृत्तिमूलकशिक्षायाः विशेषज्ञनिकायैः, तथा च उच्चशिक्षासंस्थाभिः साकं संमन्त्रयित्वा विहिता। मानदण्डोऽयं विभिन्नस्तरीयविशेषज्ञशिक्षकस्य भूमिकायाः प्रत्याशायाः तथा तस्य सोपानस्य कृते आवश्यकयोग्यतायाश्च पूरको भविष्यति। अपि चास्मिन् प्रत्येकपर्यायस्य कार्यप्रदर्शनमूल्याङ्कनस्य मानदण्डाः समाविष्टाः भविष्यन्ति पर्यायक्रमेण। राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानं (NPST) प्राक्-परिषेवा-शिक्षक-शिक्षणकार्यक्रमस्य परिकल्पनाया अपि सूचनां प्रदास्यति। ततश्च राज्यैरेष मानदण्डो गृहीतो भवितुमर्हति, यस्मिंश्च कार्यकालस्य, शिक्षकजीविकाविकाशप्रयत्नस्य, वेतनवृद्धेः, पदोन्नतेः, मान्यतान्तराणाञ्च स्वीकृतिर्विद्यते। पदोन्नतिः वेतनवृद्धिश्च कार्यकालस्य दीर्घतायाः वरिष्ठतायाः वा आधारेण न भविष्यति, अपि तु केवलं तादृशमूल्याङ्कनस्य आधारेणैव भविष्यति। अस्य निपुणतामानदण्डस्य पुनःसमीक्षा पुनःपरिशीलनञ्च २०३० तमे वर्षे भविष्यति, तदनन्तरं च प्रत्येकं दशवर्षेषु परिशीलनं भविष्यति यत्तु प्रणाल्याः प्रभावशीलतायाः दृढानुभवात्मक-विश्लेषणस्य आधारेण।”

“तदेवैकम् उत्तमशिक्षाप्रतिष्ठानं यत्र प्रत्येकं विद्यार्थिनः स्वागतं परिचर्याञ्चानुभवन्ति, यत्र सुरक्षितं प्रेरणादायकं च शिक्षणपर्यावरणं विद्यते, यत्र च विद्यार्थिनां ज्ञानाय शिक्षणानुभवानाम् उपलब्धयः प्रदत्ता भवन्ति, यत्र च शिक्षणाय उत्तमशारीरिकसंरचना, अनुकूलाः समुचिताः संसाधनाः च उपलभ्यन्ते विद्यार्थिभिः। एतादृशानां गुणानां सम्प्राप्तिः प्रत्येकस्य शैक्षिणिकसंस्थायाः आवश्यकी लक्ष्या भवतु। अपि च एभिः सह भिन्नसंस्थानेषु तथा शिक्षायाः प्रत्येकेषु स्तरेषु च निर्विघ्नैकीकरणं समन्वयश्चावश्यकौ”।

“A good education institution is one in which every student feels welcomed and cared for, where a safe and stimulating learning environment exists, where a wide range of learning experiences are offered, and where good physical infrastructure and appropriate resources conducive to learning are available to all students. Attaining these qualities must be the goal of every educational institution. However, at the same time, there must also be seamless integration and coordination across institutions and across all stages of education”.

**Dharmendra Pradhan**
Hon'ble Minister for Education;
Skill Development and
Entrepreneurship
Government of India
Shastri Bhawan
New Delhi-110001

सत्यमेव जयते

धर्मेन्द्र प्रधानः
माननीयः शिक्षामन्त्री,
कौशलविकासः उद्यमिता च,
भारतसर्वकारः
शास्त्री-भवनम्
नवदिल्ली -११०००१



# सन्देशः

राष्ट्रिय-शिक्षा-नीतिः (NEP) २०२० अत्युत्कृष्टतायै राष्ट्रस्य शैक्षिकगतिपथस्य मार्गदर्शकरूपेण सेवते। भविष्य-चिन्तन-पद्धत्या एषा शिक्षक-शिक्षण-व्यवस्थायाः यन्मार्गं प्रशस्तं करोति तन्न केवलं ज्ञानं प्रददाति, अपि तु शिक्षणं, समीक्षात्मक-चिन्तनं, सर्जनशीलताञ्च प्रति अनुरागं प्रवर्तयति - एते गुणाः एकविंशशताब्द्याम् अपरिहार्याः भविष्यन्ति स्पर्धायाम् अवकाशलाभे च सज्जीकृतशिक्षकस्य कृते ।

भविष्य-प्रजन्मनः मनसः यथायथरूपेण स्वरूपनिर्माणे शिक्षकाणां महत्त्वपूर्णां भूमिकां स्वीकृत्य इयं शिक्षानीतिः अङ्गीकरोति यत् आवश्यकैः साधनैः ज्ञानैश्च शिक्षकाणां सुसज्जीकरणं सर्वाग्रकार्यमस्ति। फलप्रदायक-शिक्षणाभ्यासस्य प्रत्याशाः तथा मार्गदर्शकतत्त्वानि च आलिख्य उन्नतशिक्षायाः गुणवत्तां सुनिश्चेतुं शिक्षकाणां कृते निपुणमानदण्डा अत्यावश्यकाः सन्ति। एते मानदण्डाः शिक्षकाणां कौशलं, ज्ञानं, योग्यताञ्च आकारयितुं महत्त्वपूर्णां भूमिकां निर्वहन्ति।

राष्ट्रिय-शिक्षक-शिक्षापरिषदा राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य मार्गदर्शकालेखः प्रधानमार्गदर्शकसिद्धान्तानां सङ्कलनरूपेण विकसितः, यस्मिंश्च भिन्नस्तरीयशिक्षकाणां भूमिकायां निहिताः प्रत्याशितभाराः दक्षताश्च सन्नद्धाः सन्ति, यत् च खलु दक्षतायाः निपुणजीविकावृत्तेश्च भिन्नस्तरे गतिशीलशिक्षणशक्तिनिर्माणाय विशेषमानदण्डरूपेण कार्यं करोति।

निरन्तरप्रयत्नेन अस्माकं राष्ट्रस्य शैक्षिकपरिमण्डलं साकारात्मकपरिवर्तनानां प्रत्यक्षसाक्षि भविष्यति, येन भविष्य-प्रजन्मनः लाभान्विताः भविष्यन्तीति दृढम् आशास्ते

**धर्मेन्द्रः प्रधानः**

# सन्देशः



अन्नपूर्णा देवी
माननीया राज्यशिक्षामन्त्रिणी
शिक्षा-मन्त्रालयस्य
भारतसर्वकारस्य

शिक्षकतावृत्तेः समुन्नतिसाधनाय समेषां कृते च गुणवत्तापूर्णशिक्षाप्रदानाय बद्धपरिकरं राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानम् (NPST) एकं तात्पर्यपूर्णं प्रतीकं संस्थापयति। मानदण्डस्यास्य मार्गदर्शकालेखोऽयं सम्यक् पर्यालोच्य, प्रगवेष्य, शिक्षाविद्भिः, विशेषज्ञैः हितैषिणैश्चालोच्य निष्पन्नः। अस्मिन् मानदण्डे एकविंशशताब्द्याः समुन्नतशिक्षणाय अत्यावश्यकं ज्ञानं, कौशलं, स्वभावः च समाहितं विद्यते। मानदण्डस्यास्य मार्गदर्शकालेखोऽयम् एकां व्यापिकां रूपरेखां प्रददाति या न केवलं शिक्षकाणां कृते सुस्पष्टतया प्रत्याशां निर्धारयति, अपि तु नीतिनैतिकतायाः क्रमोन्नतेः संस्कृतिं विषयगतज्ञानं तथा उत्तमकर्मजीवनसंसाधनाय प्रमाणादिकञ्च साधयति।

राष्ट्रियशिक्षक-शिक्षापरिषद्भ्यः तथा च अन्येभ्यः विशेषज्ञेभ्यश्च हार्दिकीं शुभाशयां विज्ञापयामि, ये मानदण्डस्यास्य समुन्नत्यै महत्त्वपूर्णां भूमिकां साधितवन्तः।

*******************************************************************************

# सन्देशः




सञ्जयः कुमारः
भारतीय-प्रशासनिक-सेवकः
सचिवः
विद्यालयशिक्षायाः साक्षरतायाश्च
शिक्षा-मन्त्रालयस्य
भारतसर्वकारस्य

भारतवर्षे शिक्षकशिक्षाक्षेत्रे एकां परिवर्तनधाराम् अनयत् राष्ट्रिय-शिक्षा-नीतिः (NEP) २०२०। समेषां कृते उत्तमगुणवत्तायुक्तशिक्षायाः लक्ष्यसिद्धये तथा शिक्षणवृत्तेर्विकाशाय च विशेषतया ध्यानं प्रदत्तं शिक्षानीत्या, अपि च सर्वासां परिवर्तनधाराणां मध्यमणिरूपेण शिक्षकाः संस्थापिताः। राष्ट्रिय-शिक्षा-नीतेः (२०२०) उद्देश्यपटलं मनसि निधाय सुपरिकल्पितसाधारणमानप्राप्तये राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य व्यापकं मार्गदर्शकालेखं निर्मितवती। राष्ट्रियशिक्षक-शिक्षापरिषद् भिन्नक्षेत्रस्थविद्वद्भिः सह पर्यालोच्य अनुसन्धानादिकं च सम्पाद्य आलेखोऽयं सुसम्पन्नः। मार्गदर्शकालेखोऽयं शिक्षकाणां योग्यतायाः विकाससाधने प्रेरको भविष्यति तथा च वैश्विकमानानुसारेण यथार्थतया शिक्षकनिर्माणे सहायको भविष्यति।

राष्ट्रियशिक्षक-शिक्षापरिषदा कार्यकर्तृभ्यः तथा च अस्मिन् कार्ये सम्बद्धेभ्यः सर्वेभ्यः हार्दिकम् अभिनन्दनं विनिवेदयामि।

# सन्देशः



**अध्यापकः योगेशः सिंहः**
अध्यक्षः, राष्ट्रीयः शिक्षकः
शिक्षापरिषद्, नवदेहली.

राष्ट्रिय-शिक्षा-नीतिः २०२० उच्चगुणवत्तायुक्तशिक्षणे प्रयत्नं साधयति, यत् शिक्षकाणां कार्यावकाशस्य तथा एकविंशशताब्द्याः कौशलसमूहस्य निर्देशकम्। राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य उन्नतमार्गदर्शकालेखस्य लक्ष्यं हि विद्यार्थिनां शैक्षिकोद्देश्यपूरणाय कुशलशिक्षकाणां निर्माणम्। राष्ट्रियं शिक्षकीय-वृत्तिसम्बन्धीय-मानं कार्यस्य तथा व्यवहारस्य उन्नतसम्भाव्यमानस्थानप्राप्तये भविष्यद्शिक्षकेभ्यः एकम् उन्नतस्थानं प्रददाति। राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य सामान्यलक्ष्यं खलु शिक्षकाणां नैतिकतायाः, गभीरविषयज्ञानस्य, वृत्तिगतसुसम्पर्कस्य, भाविजीवनस्य उन्नतेः परिकल्पना चेति। समेषां कृते गुणवत्तापूर्णशिक्षां प्राप्तुं योग्यतायाः भावनां प्रवर्धयितुं सर्वैः हितैषिणैः सह नितरां प्रतीक्षां करोमि।

*******************************************************************************

# सन्देशः



**केसांग यांगजोम शेरपा**
भारतीय-राजस्व-सेविका
सचिव-सदस्या
राष्ट्रियशिक्षक-शिक्षापरिषदः
नवदेहल्याः

राष्ट्रियशिक्षक-शिक्षापरिषदा संविधिबद्धसंस्थारूपेण शिक्षकाणां शिक्षायाः मानोन्नतये केचन पदक्षेपाः गृहीताः। राष्ट्रिय-शिक्षा-नीतिः २०२० उन्नतगुणवत्तासम्पन्नशिक्षाप्रदानस्य तथा शिक्षणप्रक्रियायाश्च अत्यावश्यकोपकरणरूपेण उन्नतगुणसम्पन्नशिक्षकान् आद्रियते। प्रसङ्गानुसारं राष्ट्रिय-शिक्षक-शिक्षापरिषदः राष्ट्रिय-शिक्षा-नीतिः २०२० इत्यस्य ५.२० अनुच्छेदानुसारमेव राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य मार्गदर्शकालेखस्य परिकल्पना जाता। मानदण्डोऽयं यथा मार्गदर्शकालेखे चित्रितः, तत्र शिक्षकाणां निपुणमानदण्डस्य एका सूचिका विद्यते, यत्र शिक्षकैः किं ज्ञातव्यं, कथं तेषां प्रदर्शनं कर्तव्यं, एकविंशशताब्द्याः फलदायकशिक्षणवृत्तेः अग्रगतिः चेति वर्णिताः सन्ति। जीवनस्य भिन्ने पर्याये दक्षताया उत अभिज्ञतायाः भिन्ने स्तरे एकस्य आदर्शशिक्षकस्य सकाशे प्रयोजनीयप्रत्याशायाः तथा च दक्षतायाः पूरको भवति राष्ट्रिय-निपुण-शिक्षण-मानदण्डः।

सर्वेभ्यः वरिष्ठेभ्यः तथा प्रारूप-समितेः सदस्येभ्यः आभारं व्याहरामि, ये राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य मार्गदर्शकालेखस्य विकाशे तथा पूर्णरूपप्रदानकार्ये समर्थनं कृतवन्तः। राष्ट्रियशिक्षक -शिक्षापरिषदः सर्वेभ्यः सदस्येभ्यः मे प्रशंसावचांसि।

# सूचिपत्रम्


| क्रमिक-संख्या | विषयाः | पृष्ठम् |
|---|---|---|
| **१.** | **भूमिका** | **1** |
| **२.** | **शिक्षणम् : एका वृत्तिः** | **3** |
| २.१ | वृत्तिरूपेण शिक्षणम् | 3 |
| २.२ | वृत्तिसम्बन्धीयमानानाम् अवबोधः | 5 |
| २.३ | शिक्षकेभ्यः प्रशिक्षणेभ्यश्च वृत्तिसम्बन्धीय-मानानां तात्पर्यम् | 5 |
| **३.** | **राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानम् (NPST)** | **7** |
| ३.१ | राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य प्रासङ्गिकता | 7 |
| ३.२ | शिक्षकाणां वृत्तिसम्बन्धीय-मानम् | 9 |
| ३.३ | योग्यतायाः वृद्धिः अभ्युन्नतिश्च | 12 |
| ३.४ | राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानम् | 12 |
| **४.** | **राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य प्रारूपम्** | **14** |
| ४.१ | प्रथममानम् - मौलिकमूल्यबोधाः नैतिकताश्च | 14 |
| ४.२ | द्वितीयमानम् - ज्ञानम् अभ्यासश्च | 14 |
| ४.३ | तृतीयमानम् - वृत्तिसम्बन्धीया वृद्धिः अभ्युन्नतिश्च | 15 |
| **५.** | **कार्यसाधनम्** | **24** |
| ५.१ | कार्यपरिकल्पना | 24 |
| ५.२ | प्रयोज्यता | 25 |
| ५.३ | पर्यायि-समीक्षा | 25 |
| **६.** | **राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य रूपरेखानुसारं मूल्याङ्कनसाधनानि** | **26** |

| | | |
|---|---|---|
| ७. | राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानविषये राष्ट्रिय-शिक्षक-योग्यता-संस्थानस्य कृते अङ्कीय-आधारभूतसंरचनायाः परिकल्पना | **40** |
| ८. | व्यवहृतचित्रसूचिः | **43** |
| ९. | परिभाषाः | **44** |
| १०. | व्यवहृतग्रन्थसूचिः | **46** |
| ११. | राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य विशेषज्ञ-समितिः | **47** |

# १. भूमिका

भारतवर्षस्य शिक्षाव्यवस्थायां राष्ट्रिय-शिक्षा-नीतिः मौलिकसंस्कारस्य मध्यमणिरूपेण स्थापयति शिक्षकम्। शिक्षा हि एका निरन्तरप्रक्रिया, या प्रत्येकस्य नागरिकस्य जीवनं प्रभावयति, यत्र च शिक्षकाणां गुरुत्वपूर्णा भूमिका विद्यते। राष्ट्रियं शिक्षकीय-वृत्तिसम्बन्धीय-मानं राष्ट्रिय-शिक्षा-नीतेः (२०२०) लक्ष्याणि सम्पादयितुं प्रयतते, येन सर्वे विद्यार्थिनः सर्वोत्तमशिक्षाग्रहणे समानाधिकारिणो भवेयुः। राष्ट्रियं शिक्षकीय-वृत्तिसम्बन्धीय-मानम् आश्वासयति यत् सर्व एव शिक्षका उद्यमिनः, प्रणोदिताः, उत्तमगुणवत्तायुक्ताः, सुसंसिद्धाः, विद्यालयस्य सर्वेषु एव स्तरेषु सर्वेभ्यः शिक्षार्थिभ्यः शिक्षाप्रदाने सुसज्जिताः च भवेयुः। इत्थम्, उत्कृष्टप्रतिभायाः नितरामेवावश्यकता विद्यते शिक्षणव्यवस्थायाम्।

राष्ट्रियं शिक्षकीय-वृत्तिसम्बन्धीय-मानम् समग्रकर्मजीवनस्य भिन्ने स्तरे शिक्षकाणां गुणानां चिह्नितकरणे सौविध्यं जनयति। किञ्च, मानदण्डोऽयं सर्वेषां शिक्षकाणां समवधानताम्, अध्यवसायं, कर्मदक्षतायाः उन्नतिं च प्रति प्राधान्यं ददाति। मानदण्डाः तथा तत्सदृशाः नीतयः मौलिक-राष्ट्रिय-शिक्षा-नीतेः अनुरूपा एव, याश्च शिक्षाव्यवस्थायाः मार्गदर्शिका भविष्यन्ति, तथा च सर्वेभ्यः उत्कृष्टगुणयुक्तशिक्षां प्रदातुं राष्ट्रिय-शिक्षा-नीतेः उद्देश्यं प्रति सहमतं पोषयिष्यन्ति। अपि च, राष्ट्रियं शिक्षकीय-वृत्तिसम्बन्धीय-मानं पूर्वकृतवृत्तिक-शिक्षकाणां शिक्षाकार्यक्रमस्य परिकल्पने तथा च शिक्षकवृत्तेः सर्वेषां पक्षाणां निर्धारणे सहायतां करिष्यति।

शिक्षकाणां कौशलवर्धनाय कृतप्रयत्नफलं लभन्ते छात्राः। राष्ट्रिय-वृत्तिमूलक-शिक्षक-मानदण्डः भिन्नकर्मजीवनस्तरेषु विभिन्नविशेषज्ञतास्तरेषु च शिक्षकेभ्यः किम् अपेक्षितं, तथा शिक्षकाणां कृते प्रयोजनीययोग्यताम् अपि उपवर्णयति। अस्य नैपुण्यमानदण्डस्य राष्ट्रियस्तरीयं पुनर्मूल्याङ्कनं परिशीलनञ्च भविष्यति २०३० तमे वर्षे, तदनन्तरं प्रत्येकं दशवर्षेषु दृढानुशासनं तथा पर्यालोचनाञ्चाश्रित्य मूल्याङ्कनं भविष्यति।

राष्ट्रियशिक्षक-शिक्षापरिषद् अधिनियमेन (NCTE Act) १९९३ तमे वर्षे निर्मिता एका संविधिबद्धसंस्था। एषा पूर्वकृतवृत्तिकानां तथा प्रचलद्वृत्तिकानां चोभयशिक्षकाणां परिकल्पितोन्नयनस्य तथा समन्वितोन्नयनस्य कृते अनिवार्यरूपास्ति सम्पूर्णेऽस्मिन् देशे। शिक्षामन्त्रिण आदेशानुसारं २०२१ तमवर्षस्य आयव्ययके राष्ट्रियं शिक्षकीय-वृत्तिसम्बन्धीय-मानम् इति उद्घोषितस्यास्य विषयस्य सम्पादनाय न्यस्तभारा हि राष्ट्रियशिक्षक-शिक्षापरिषद्। राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य भिन्नक्षेत्रस्थविशेषज्ञात् प्राप्ततथ्यानुसारं तथा दृढपर्यालोचनानुसारं राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य आलेखसंरचनाय एकस्या विशेषज्ञसमितेः निर्माणमभवत्। प्राथमिकानुसन्धानम् अङ्कीयपर्यालोचनया २०२१ तमवर्षस्य एप्रिलमासि MyNEP2020 इति आन्तर्जालिकसंकेतमाध्यमेन एव जातं, यत्र राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य आलेखनिर्माणाय परामर्शस्य तथा तथ्यस्य आमन्त्रणमासीत्।

किं बहुना, क्षेत्रान्तरेषु विशेषतया चितदर्शकेषु प्रश्नपटलप्रदानेन विशिष्टटिप्पणीनां तथा तथ्यानाञ्च आमन्त्रणाय आनुसङ्गिकानुसन्धानमपि संजातम्।

राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानालेखस्य तुलनात्मकाध्ययनमाश्रित्य संरचितं देशचतुष्टयस्य विवरणम् अन्ताराष्ट्रीय-श्रेष्ठानुशीलनरूपेण परिगणितम्। बहुपर्यालोचनायाः परिशीलनाच्चानन्तरं विशेषज्ञ-समितिभिः निर्मितं राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य प्राथमिकप्रारूपं २०२१ तमवर्षस्य नभेम्बरमासस्य १७ दिनाङ्के राष्ट्रियशिक्षक-शिक्षापरिषद् अन्तर्जालपूटमाध्यमेन तथा MyGov इति आन्तर्जालिकसंकेतमाध्यमेन च विकशितं प्रकाशितञ्च सर्वेषां जनानां मतप्राप्तये। युगपत्तया, समग्रदेशं व्याप्य विद्वद्भिः, शिक्षकीय-आधिकारिकैः, शिक्षितशिक्षकैः, विभागाध्यक्षैः, राज्य-शैक्षिकानुसंधानस्य तथा प्रशिक्षणस्य परिषद्भिः (SCERTs), जनपदीय-शिक्षा-प्रशिक्षण-संस्था-सदस्यैः (DIETs), अध्यक्षैः, सर्वकारशासनाधीनशिक्षकैः, स्वतन्त्राधीनशिक्षकैः, असर्वकाराधीनसंस्था-सदस्यैः, अन्यैश्च विशेषज्ञैश्च सह पञ्चदशमुक्तालयचर्चाः समायोजिताः नूतनतथ्यस्य तथा धारणायाः संग्रहणाय, येभ्यः राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य प्राथमिक-प्रारूपसंरचना सुसम्पन्ना स्यात्।

समकालमेव, आ भारतं व्याप्य शिक्षकैः, अध्यक्षैः, जनपदीय-शिक्षा-प्रशिक्षण-संस्था-सदस्यैः (DIETs), राज्य-शैक्षिकानुसंधानस्य तथा प्रशिक्षणस्य परिषद्भिः (SCERTs) च सह पञ्च-गृहाभ्यन्तराधिवेशनमपि संजातं राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य प्राथमिकप्रारूपस्य कृते संप्राप्ततथ्यानां मूल्याङ्कनाय, किं बहुना, व्यवहृतपद्धतिविषये परामर्शलाभाय, तस्य परामर्शस्य च मूल्याङ्कनाय। तृतीयस्तरीयगवेषणालब्धानि विशेषज्ञप्रदत्ततथ्यानि विशेषसूचनाः वा राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य चुरान्तप्रारूपरूपेण परिगणिताः, अपि च २०२२ तमवर्षस्य मार्चमासस्य २९ तमे दिनाङ्के राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य कृते निर्मितसमितेः समक्षं स्थापितं तत्प्रारूपं, यस्य क्षेत्र-परीक्षण-संस्करण-रूपेण अनुमोदनम् अभवत्। राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य मार्गदर्शकालेखस्य वास्तविकतायास्तथा प्रभावस्य च मूल्याङ्कनं आ भारतं व्याप्य ११७५ संख्यकशिक्षकैः सह ७५- (२५ केन्द्रीय-विद्यालय-संस्थाः + २५ नवोदय-विद्यालय-समितयः + २५ केन्द्रीय-माध्यमिक-शिक्षा-संस्थाः) संख्यक-केन्द्र-सर्वकार-शासनाधीने विद्यालये परीक्षामूलकगवेषणामाध्यमेन संजातम्।

राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानं राष्ट्रिय-शिक्षा-नीतिः २०२० इत्यस्य ५.२० अनुच्छेदानुसारं संरचितं, यस्य च लक्ष्यं भवति सर्वेषां शिक्षार्थिनां कृते उत्कृष्टशिक्षायाः समानाधिकारप्रदानम्। विद्यालयीयशिक्षायाः विषये राष्ट्रिय-शिक्षा-नीतिः २०२० इत्यस्य जनादेशं प्राप्तुं राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य मार्गदर्शकलेखपत्रस्य उन्नयनं जातं, यत्र सर्वेषां छात्राणां शिक्षणं भावुकैः, प्रेरितैः उच्चयोग्यैः, वृत्तितः प्रशिक्षितैः, सुसज्जितैः च शिक्षकैः क्रियते। अस्योद्देश्यं हि शिक्षकवृत्तिप्रबन्धनस्य अन्येषां मान्यतानां च सर्वेषां पक्षाणां निर्धारणम्। इयं एका गुणानां विवृतिः, किञ्च, या भिन्नस्तरीयशिक्षकाणां दक्षतां निर्धारयति।

राष्ट्रियशिक्षक-शिक्षापरिषद् राष्ट्रिय-शिक्षक-योग्यता-संस्थान-रूप-अङ्कीय-स्थानस्य निर्माणम् अभवत्, यस्योपरि राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य कार्यकरिकरणाय राष्ट्रिय-निधिगत-भारः स्थास्यति। किं बहुना, अधिकाधिकतया विदुषां जनानां / संस्थानानाम् उत्पादनाय विशेषज्ञानां/ वास्तवायनकारिणः संस्थानाञ्च सक्षमतायाः विवृद्धये कार्यक्रमो भविष्यति।

राज्यशासितजनपदस्य / केन्द्रशासितजनपदस्य च सर्वकारः मानानि स्वीकर्तुं शक्नोति, नूतनशिक्षणविद्यालयसंरचनायाः (५+३+३+४) अनुसारं शिक्षकाणाम् अपेक्षितकौशलसमूहस्य पूर्तये तदेव कार्यान्वितुं शक्नुवन्ति संस्थाः।

# २. शिक्षणम् : एका वृत्तिः

## २.१ वृत्तिरूपेण शिक्षणम्

शिक्षणं हि विश्वस्य सर्वश्रेष्ठा वृत्तिः, या सामाजिकाग्रगत्या सह सम्बद्धा। पुराकल्पे, समाजे सम्माननीयः सदस्यः आसीत् शिक्षकः, अस्याञ्च वृत्तौ उच्चशिक्षिताः जना एव प्रवेशार्हाः आसन्। शिक्षकाः प्रशिक्षणव्यवस्थायाः मध्यमणयः आसन्, सर्वोत्कृष्टरूपेण ज्ञानस्य दक्षतायाः नैतिकतायाः च शिक्षार्थिषु प्रेरणं तेषां नितरामेव प्रयोजनमासीत्। शिक्षाव्यवस्थायाः विवर्तनेन तथा शिक्षकाणां भूमिकापरिवर्तनेन साकं दृढदीर्घस्थायिराष्ट्रनिर्माणाय शिक्षकाणां गुणगतमानवृद्धिः अत्यावश्यकी। सामाजिककार्यस्य सामाजिकानुसन्धानस्य च स्वरूपतया शिक्षणं भवति नैतिकतापूर्णं तथा च उच्चानुशीलनं, यत्र योग्यवृत्तिकानां प्रयोजनम्:

- शिशूनां परिचर्या, तेषु प्रेमभावः, छात्रवैविध्यं प्रति सम्मानप्रदर्शनं, सामाजिक-सांस्कृतिक-राजनैतिक-सन्दर्भेषु शिशूनाम् अवगमनं, तेषां प्रयोजनीयतां समस्याञ्च प्रति संवेदनशीलतायाः विकाशः, शिशुषु समानरूपेण उपचरणं करणीयम्।
- शिशवः न केवलं ज्ञानस्य निष्क्रियग्रहीतृरूपेण स्वीकरणीयाः, तेषाम् अर्थनिर्माणस्य स्वाभाविकप्रवृत्तिः वर्धनीया, निरुत्साहनीयं कण्ठस्थशिक्षणं, शिक्षणम् आनन्ददायकं, सहयोगि, सार्थकञ्च करणीयम्।
- पाठ्यविषयाः पाठ्यपुस्तकानि च विवेचकदृष्ट्या परीक्षणीयानि, तथा च स्थानीयप्रयोजनानुरूपं यथार्थपाठ्यविषयं संयोजनीयम्।
- पाठ्यक्रमे निहितं ज्ञानं 'देयम्' इत्येवम्प्रकारेण न विवेचनीयम्।
- शिक्षार्थि-केन्द्रिकं, कार्यकलापाधारितं, स्पर्धाभागग्रहणस्य अभिज्ञता चेत्यादीनां समायोजनं करणीयं, किञ्च, विद्यार्थिनः क्रीडायां, परियोजनायां, चर्चायां, संवादे, भ्रमणे, चिन्तनप्रशिक्षणे च योजनीयाः।
- शिक्षार्थिनां सामाजिकयाथार्थ्येन स्वकीयसत्यतया च साकं शिक्षणस्य एकीकरणं, कक्षायां वैचित्र्यञ्च प्रति प्रतिक्रियाप्रदानं करणीयम्।
- शान्तिः, लोकतान्त्रिकजीवनपद्धतिः, समानता, न्यायः, स्वतन्त्रता, भ्रातृत्वबोधः, धर्मनिरपेक्षता, सामाजिकपुनर्निर्माणस्य उद्यमः चेति मूल्यानि प्रवर्धनीयानि।

विशेषज्ञैः सह विचारविमर्शद्वारा मानदण्डानामुपरि ऐकमत्यविषये स्पष्टीकरणं तथा सम्प्राप्तिः मार्गदर्शयितुं शक्यते यत्:

- उत्कृष्टशिक्षणाय सुस्पष्टता तथा अङ्गीकारश्च आवश्यकः।
- सन्दर्भविचाराणाम् अवबोधः उत्तमशिक्षणं संशुध्यति, समर्थयति च।

- शिक्षकाणां कृते तेषां वृत्तिसम्बन्धीयाभ्यासस्य अत्यावश्यकमात्रा स्पष्टीकरणीया, पुनरावृत्तिश्चापि करणीया, ध्येयं यथा श्रेणिकक्षः शिक्षाकेन्द्रिकः भवेत्, अपि च छात्राः यथा आत्म-चिन्तका भवेयुः तद्विषये मार्गः दर्शनीयः।
- शिक्षकाणां, उत्तमशिक्षणस्य, तथा च शिक्षकाणां कर्मजीवनोन्नतये प्रस्तुतेश्च अनुकूलनाय पारिस्थितिकतन्त्रस्य बहिर्व्यवस्थायाः च परिकल्पनायाः प्रबन्धनस्य च अधिकावगतिरावश्यकी।

२००९ तमवर्षस्य शिक्षाधिकारस्य विध्यनुसारं शिक्षकसकाशात् प्रत्याशाः, तथा शिक्षणगुणाः स्थिरीकरिष्यन्ति यत् विद्यालयेषु शिशवः भावात्मक-शिक्षाभिज्ञतासम्पन्नाः भवेयुः, येन शिक्षायाः माध्यमेन सशक्तिकरणं भविष्यति। २००९ तमवर्षस्य शिक्षाधिकारस्य विध्यनुसारं शिक्षणं यथा स्यात् : **[विभागः २९/२, शिक्षाधिकार-विधिः, २००९]**

- लोकतान्त्रिकं, न्यायपूर्णं, शान्तिपूर्णं च समाजं प्रबोधयितुं भारतवर्षस्य संविधाने निहितमूल्यानाम् अनुरूपव्यवहारः।
- शिक्षार्थिनः सामग्रिकविकाशाय प्रेरणीयाः।
- विद्यार्थिनां शिक्षा, सम्भावना, प्रतिभा च विकशनीया।
- विद्यार्थिनां शारीरिकं मानसिकं च क्षमता पूर्णतया विकशनीया।
- बालक-मित्ररीत्या, बालककेन्द्रिकरीत्या च क्रियाकलापानाम्, आविष्कारस्य, अन्वेषणस्य च माध्यमेन शिक्षणं सक्षमं करणीयम्।
- यथासम्भवं विद्यार्थिषु मातृभाषा व्यवहारयोग्या करणीया।
- सुनिश्चितं च करणीयं यत् शिक्षणं भयमुक्तम् आघातमुक्तम् उद्विग्नतामुक्तं च भवेत्, तथा च विद्यार्थिनः स्वतंत्रवाग्व्यवहारे साहाय्यं करणीयम्।
- अवबोधस्य दक्षतायाश्च निरन्तरं व्यापकं मूल्याङ्कनं विधेयम्।

इत्येवम्प्रकारेण प्रत्येकं बालकाः गौरवपूर्णं जीवनं जीवितुं समर्थाः भविष्यन्ति।

शिक्षा समावेशिनी भवेत् इति सुनिश्चित्य विशेषप्रयत्नानाम् आवश्यकतां प्रति भारतीयसंविधानम् अधिकं ध्यानम् आकर्षयति तथा च प्रान्तिकजनसमूहस्य, भाषागत-सांस्कृतिक-संख्यालघुसमूहस्य, अनुसूचित-जातेः जनजातेश्च छात्राणां प्रति अन्यानग्रसरसम्प्रदायानां शिशूनां च प्रत्यप्यधिकं ध्यानमाकर्षयति।

राष्ट्रिय-शिक्षा-नीतिः २०२० इत्यस्यां शिक्षायाः अधिकारः, तथा च प्रकृतपक्षे शिक्षायाः उद्देश्यं हि समावेशीयशिक्षा तथा विद्यालयस्य सर्वेषु स्तरेषु श्रेणीकक्षेषु वैचित्र्यविधानम्।

राष्ट्रिय-शिक्षा-नीतिः २०२० विशिष्टाः स्पर्धाः प्रति ध्यानम् आकर्षति, यासु शिक्षकाणां शिक्षागतानुशीलनानि प्रतिक्रियाशीलानि भवेयुः।**(नीतेः मुख्यसिद्धान्ताः)**

- कण्ठस्थीकरणशिक्षातः उच्चतरक्रमचिन्तायां, समालोचनामूलकचिन्तायाम्, अनुसन्धाने तथा च एकविंशतमशताब्द्याः कौशलेषु शिक्षायाः स्थानान्तरम् आवश्यकम्।

- शिक्षणं बहुविषयात्मकम्, अनुभवात्मकं, हस्तगतञ्च करणीयम्।
- बहुभाषिकता
- स्वदेशीयज्ञानस्योत्तरदानस्य मूल्यनिरूपणे तथा एकीकरणे छात्रान् सक्षमं करणीयम्

## २.२ वृत्तिसम्बन्धीयमानानाम् अवबोधः

'मानम्' इति शब्दोऽयं भिन्नसन्दर्भेषु भिन्नदेशेषु च भिन्नार्थे अभिहितो भवति। मानानि वृत्तौ किं मूल्यविशिष्टानि भवन्तीति विषये सूचकानि, साधारणतया शिक्षणस्य अभ्यासस्य च कृते किं ज्ञातव्यं तद्विषयं वर्णयन्ति, सम्बन्धं च स्थापयितुं व्यवहृतानि भवन्ति। शिक्षणसन्दर्भे मानानि शिक्षणपरिभाषारूपेण परिभाषितानि भवन्ति, परन्तु वृत्तिसम्बन्धीयसन्दर्भे मानानि योग्यतायाः मात्रारूपेण परिभाषितानि भवन्ति, वस्तुतः कस्यांश्चित् वृत्तौ योग्यतां निरूपयितुं कमपि किं ज्ञातव्यं किं च कर्तुं सक्षमो भवितव्यं तदिमानि मानानि ज्ञापयन्ति। अर्थान्तिरेषु, मानानि वृत्तिनिपुणशीलस्य कर्मक्षमतां परिमातुं मानदण्डरूपेण उपकरणरूपेण वा व्यवहृतानि भवन्ति, येन मानसम्पन्नकार्यदक्षतायाः कृते सक्षमतया विवेचितानि भवेयुः। मानं हि एका विवृतिः, या प्रतिबिम्बितं करोति यत् वृत्तौ किद्दशं मूल्ययुक्तमस्ति, कीद्दशी मानयुक्ता शिक्षा, तथा च मानयुक्तशिक्षायाः अन्तर्निहितानुमानम्। विवृतयः ज्ञापयन्ति यत् शिक्षकाणां किं ज्ञातव्यं, किं विश्वसनीयं, किञ्च कर्तुं सक्षमाः भवितव्यम्।

## २.३ शिक्षकेभ्यः प्रशिक्षणेभ्यश्च वृत्तिसम्बन्धीय-मानानां तात्पर्यम्

उत्कृष्टस्य अभीप्सितस्य च शिक्षणस्य वर्णनं तथा शिक्षकाणां गुणाः वैशिष्ट्यानि च अनेकनीतिलेखपत्रेषु प्रत्यक्षतया अप्रत्यक्षतया च प्राप्यन्ते । एताः धारणाः शिक्षायाः उन्नत्यर्थं सर्वशिक्षाभियानरूपकेन्द्रप्रदत्तधनयोजनोद्योगस्य प्रारम्भमाध्यमेन कर्मरतशिक्षायाः प्रशिक्षणस्य च उद्देश्यं सूचयन्ति। एताः धारणाः राष्ट्रिय-शिक्षक-प्रशिक्षण-पाठ्यक्रमरूपरेखायाः निर्धारितमार्गदर्शिकासु अन्तर्निहिताः सन्ति, तथा च राष्ट्रिय-शिक्षा-नीतिः २०२० इत्यस्याम् अनुशंसितरूपेण सेवाकृतशिक्षकशिक्षाकार्यक्रमाणां पाठ्यक्रमरूपरेखाया विकाशे परिकल्पने च साम्प्रतिककाले एव प्रयत्नं प्राप्तवत्यः।

राष्ट्रिय-शिक्षा-नीतिः २०२० प्रस्तौति यत् वृत्तिसम्बन्धीयमानानि वृत्तिं नियन्त्रयिष्यन्ति, तेषां निर्माणं संस्थानञ्च भविष्यति, यत्खलु उत्तरदायिना, पर्यवेक्षणेन, वृत्तयोग्यताविकाशेन, प्रतिस्तरीयकर्मजीवनस्य मार्गेण, उल्लम्बनगतिशीलतया च सम्बन्धयुक्तानि भवेयुः। शिक्षकाणां कृते एतानि वृत्तिसम्बन्धीयमानानि एका विधिः भवितुमर्हन्ति।

- एकस्य शिक्षकस्य कार्यप्रकृतिः निरूपणीया।
- कार्यस्य उपचारस्य च अनुकूलपरिस्थितिः करणीया।
- शिक्षक-शिक्षण-कार्यक्रमाणां पुनरुद्भावनम्।
- शिक्षकाणां पञ्जीकरणम्
- जीवन-व्यापिनी शिक्षा तथा कर्मजीवनस्य उन्नतेः प्रसारः।
- शिक्षकीय-योग्यतायाः अभिन्नता तथा च गतिशीलता स्थापनीया।
- शिक्षक-गुणानां मूल्याङ्कनम्।
- शिक्षकप्रेरणायाः समर्थनम्।
- शिक्षकस्य उत्तरदायित्वस्य / कर्तव्यतायाः वा सुनिश्चितकरणम्।

मानानां स्वरूपविषये अवधारणा भिन्ना भवितुमर्हति विशेषव्यवहारानुसारम्; तथापि, मानानां साधारणसमूहः निश्चितं करिष्यति यत् शिक्षकैः शिक्षणैश्च सह सम्बद्धासु नीतिषु समन्वयो विद्यते।

# ३. राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानम्

ज्ञानपरिदृश्यानुसारं भारतस्य परिवर्तनं जायमानमस्ति। अतः, एकविंशतिशताब्द्याः याचनानुसारं शिक्षाव्यवस्थायाः संस्करणम् अत्यावश्यकम्। एकविंशशताब्द्यां देशस्य प्रथमं शिक्षाविषयकं नीतिर्हि भारतवर्षस्य राष्ट्रिय-शिक्षा-नीतिः २०२०, यस्याश्च लक्ष्यं हि अस्माकं देशस्य क्रमवर्धमानोन्नयनमूलकप्रयोजनानां सम्बोधनम्। शिक्षकाः यथार्थतया अस्माकं शिशूनां भविष्यम् आकारयन्ति, तस्मादेव ते नः राष्ट्रस्य उत्तराधिकारिणः। सामग्रिकस्य तथा गुणगतशिक्षायाः लक्ष्यप्राप्तये राष्ट्रिय-शिक्षा-नीतिः २०२० विशेषतया शिक्षणवृत्तेः सार्विकतया विकाशम् अवाधारयत् किञ्च, अस्य संस्कारमूलककर्मयज्ञस्य मध्यमणिरूपेण शिक्षकान् एव अचिनोत्। शिक्षकतावृत्तौ प्रवेशाय उत्तमा उज्ज्वलाश्च विद्यार्थिनः प्रोत्साहनीयाः, किञ्च, शिक्षकाः समर्थाः भवेयुः, तथा च तेभ्यः शिक्षकेभ्यः सहयोगिता करणीया यथा ते यतासम्भवं फलप्रदायकरूपेण कार्यं सम्पादयितुं शक्नुवन्ति।

## ३.१. राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य प्रासङ्गिकता

"राष्ट्रिय-शिक्षक-शिक्षापरिषदा (NCTE) राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य (NPST) एकसार्वजनीनमार्गदर्शकस्य विकाशो भाविष्यते २०२० तमे वर्षे, यस्य पुनःसंरचना भविष्यति निपुण-मानदण्ड-निर्धारण-निकाय- (PSSB) रूपेण सामान्य-शिक्षा-परिषदः (GEC) तत्त्वावधाने । सा च संरचना राष्ट्रिय-शैक्षिकानुसंधानस्य प्रशिक्षणस्य च परिषदा (NCERT), राज्य-शैक्षिकानुसंधानस्य प्रशिक्षणस्य च परिषदा (SCERT), सर्वस्तरस्य सर्वक्षेत्रस्य च शिक्षकैः, शिक्षकसज्जीकरणस्य विकाशस्य च विशेषसंगोष्ठिभिः, वृत्तिमूलकशिक्षायाः विशेषज्ञनिकायैः, तथा च उच्चशिक्षासंस्थाभिः साकं संमन्त्रयित्वा विहिता। मानदण्डोऽयं विभिन्नस्तरीयविशेषज्ञशिक्षकस्य भूमिकायाः प्रत्याशायाः तथा तस्य सोपानस्य कृते आवश्यकयोग्यतायाश्च पूरको भविष्यति। अपि चास्मिन् प्रत्येकपर्यायस्य कार्यप्रदर्शनमूल्याङ्कनस्य मानदण्डाः समाविष्टाः भविष्यन्ति पर्यायक्रमेण। राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानं (NPST) प्राक्-परिषेवा-शिक्षक-शिक्षणकार्यक्रमस्य परिकल्पनाया अपि सूचनां प्रदास्यति। ततश्च राज्यैरेष मानदण्डो गृहीतो भवितुमर्हति, यस्मिंश्च कार्यकालस्य, शिक्षकजीविकाविकाशप्रयत्नस्य, वेतनवृद्धेः, पदोन्नतेः, मान्यतान्तराणाञ्च स्वीकृतिर्विद्यते। पदोन्नतिः वेतनवृद्धिश्च कार्यकालस्य दीर्घतायाः वरिष्ठतायाः वा आधारेण न भविष्यति, अपि तु केवलं तादृशमूल्याङ्कनस्य आधारेणैव भविष्यति। अस्य निपुणतामानदण्डस्य पुनःसमीक्षा पुनःपरिशीलनञ्च २०३० तमे वर्षे भविष्यति, तदनन्तरं च प्रत्येकं दशवर्षेषु परिशीलनं भविष्यति यत्तु प्रणाल्याः प्रभावशीलतायाः दृढानुभवात्मक-विश्लेषणस्य आधारेण।"




चित्रम्, १ - शिक्षकीय-सज्जतायाः चित्रोदाहरणम्।

३.१.१ शिक्षक-शिक्षाः राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानं सेवापूर्व-शिक्षकशिक्षाकार्यक्रमस्य ४वर्षीयस्य २वर्षीयस्य तथा १वर्षीयस्य शिक्षाशास्त्रीकार्यक्रमस्य प्रारूपं सूचयिष्यति यथा राष्ट्रिय-शिक्षा-नीतिः २०२० इत्यनया परिकल्पितं वर्तते।

३.१.२ शिक्षकस्य भूमिकायाः प्रबन्धनम् - मानानि हि विविधेषु स्तरेषु शिक्षकाणां भूमिकायाः तथा तदर्थं प्रयोजनीयनैपुण्यस्य सूचकाः भविष्यन्ति। प्रत्येकं चरणस्य कृते राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानम् कार्यप्रदर्शनमूल्याङ्कनस्य मानं निर्धारयिष्यति।

३.१.३ शिक्षकवृत्तिप्रबन्धनम् : शिक्षकवृत्तिप्रबन्धनस्य सर्वा दिशः यथा कार्यकालः, व्यवसायिकविकासप्रयन्ताः, वेतनवृद्धिः, पदोन्नतिः अन्याश्च मान्यताः अत्र वर्तन्ते।

३.१.४ शिक्षकवृत्तिनैपुण्यसमृद्धिः : शिक्षकेभ्यः निरन्तरं स्वसमृद्धये तथा नवनवोन्मेषस्य ज्ञानाय तथा स्ववृत्तौ अग्रगत्यर्थम् अवसरः प्रदास्यते ।

राष्ट्रिय-शिक्षा-नीतिः २०२० – अनुसारं शिक्षकाणां प्रस्तुतिः हि एकः कार्यक्रमः यत्र बहुविषयकदृष्टिकोणानां ज्ञानस्य च आवश्यकता, प्रवृत्तीनां मूल्यबोधानां च निर्माणम्, उत्तममार्गदर्शकसाहाय्येन अभ्यासस्य विकासः इत्येते अत्यावश्यकाः सन्ति। एतदर्थं शिक्षकैः भारतीयमूल्यबोधज्ञैः भाव्यम्। ते तु भारतीयभाषायां ज्ञाने संस्कृतौ च यथा निपुणा भवेयुः तथा आधुनिकशिक्षाविज्ञानस्य नवनवानुसन्धानेषु अपि कुशला भवेयुः। राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानं हि एकं सार्वजनिकं वक्तव्यं यत्र शैक्षणिकगुणवत्ता तथा भारतीयच्छात्राणां शैक्षिकपरिणामस्य उन्नतिः विधृता वर्तते। एते मानकाः मार्गदर्शकपरिभाषाणाम् एका पङ्क्ती भविष्यन्ति यत्र वृत्तेः विविधेषु स्तरेषु शिक्षकस्य भूमिका का भवेदिति उल्लिखिता स्यात्। अपि चायं मानकः स्थिरीकरिष्यति यत् फलशालिन्याः शिक्षायाः स्वरूपं कीदृशं स्यात्, अपि च एकविंशशताब्द्यां विद्यालयेषु शिक्षकरूपेण तस्याः वृत्तेः प्रत्येकं स्तरेषु अभ्यासाय कीदृश्याः अर्हताया आवश्यकता वर्तते इति।

## ३.२. शिक्षकाणां वृत्तिसम्बन्धीय-मानम्

शिक्षकाणां वृत्तिनैपुण्यमानकल्पनं हि उत्तमशिक्षकाणां गुणावलीं तथा उत्तमशिक्षणपद्धतिम् आकर्षति। अपि च इदं भारतवर्षे शिक्षण-शिक्षकनिर्माणयोः विषये अनुसन्धाने दृष्टिक्षेपं करोति। तथैव अत्र अध्यापकानां तथा अध्यापनगुणानां माननिर्धारणार्थम् उद्योगः दृश्यते।

### क. अर्हता / सामर्थ्यम्

शिक्षकाणां कृते वृत्तिनैपुण्यस्य स्वरूपनिर्माणे अध्यापनस्य कृते अत्यावश्यकानां मौलिकयोग्यताः प्रति सावधानेन भाव्यम्। योग्यतापदेन वयमत्र ज्ञान-दक्षता-अवगति-मूल्यबोध-मानससंस्थिति-इच्छाशक्तीनां संहतिः वाच्या या तु मानवानां एकस्यां निर्दिष्टदिशि परिचालनं करोति।

### ख. क्षेत्राणि/ विषयाः

शिक्षकाणां ज्ञानं तथा शिक्षणाभ्यासः मिथः संसर्गी, उभयमेव विश्वासैः क्षमताभिः कथोपकथनयोग्यताभिः वृत्तिपरिचयेन नीत्या मूल्यबोधेन स्वभावेन च सम्बद्धं भवति। अधस्ताद् उल्लिखिताः त्रयः विषया हि अत्र प्रमाणरूपेण चिह्निताः। ते यथा -

१. मौलिकमूल्यबोधाः नीतिबोधाश्च

२. ज्ञानम् अभ्यासश्च

३. वृत्तिसम्बन्धि-वृद्धिः अभ्युन्नतिश्च

### ग. शिक्षकविवरणम्

यावत् सम्भवं शिक्षादानकौशलस्य वृद्धिः इति विषयः उत्तमशिक्षादानस्य समृद्धेः संकेताय भवति यद्धि उच्चस्तरीयमर्यादां लब्धुं यतमानः भवति। राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य कृते अधो लिखिताः त्रयः विषयाः सर्वस्तरीय-शिक्षण-योग्यता-कौशलस्य माननिर्धारकाः सन्ति। एभिः माननिर्धारकैः हि शिक्षका एतद् अवगन्तुं शक्नुयुः यत् शिक्षकाः किं कार्यं कर्तुं सक्षमा तथा च कुत्र कुत्र तेषाम् इतोऽपि प्रयत्न आवश्यकः। एतद्धि योग्यता-कौशलस्य प्रमाणं शिक्षकाणां वृत्ति-अन्वेषणेऽपि सहायकं भविष्यति। ते स्तराः यथा -

१. प्रवीणः

२. उन्नतः

३. कुशलः

राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानं भवति एकः मार्गदर्शनप्रलेखः यः उच्चगुणवत्तायुक्तानां शिक्षकाणां सज्जीकरणे उत्पादने च सम्बद्धानां सर्वेषां हितधारकाणां सहायतां करोति। शिक्षकाणां कृते शिक्षक एव भवेयम् इति सिद्धान्तग्रहणाद्

आरभ्य शिक्षणयात्रायाः समाप्तिपर्यन्तं स्पष्टं कौशलमार्गं प्रददाति। अयं प्रलेखः गुणवत्तापूर्णशिक्षकाणां निर्माणार्थं शिक्षकशिक्षणसंस्थानां मार्गदर्शनं करोति।

शिक्षकवृत्तेः विशेषपदं प्राप्तुं अपेक्षणीयानि मानकानि प्रागेव सज्जीकृतानि सन्ति। शिक्षको हि तस्य लक्ष्यभूतं पदं प्राप्तुं तदर्थम् अपेक्षणीयं नैपुण्यं प्राप्नुयात् तथा तस्य प्रमाणप्रदर्शनमपि कुर्यात्।

एकस्य स्तरस्य कृते अपेक्षणीयनैपुण्यम् अवाप्य शिक्षकः तत् प्रमाणपत्रं प्राप्य प्रातिष्ठानिकतया तस्मिन् स्तरे उन्नीयशिक्षणाभ्यासे स्वकीयनैपुण्यस्य प्रयोगेण स्वकौशलं फलशालिनं कुर्यात्, पुनश्च वृत्तेः परवर्तिनि स्तरे गन्तुं स्वनैपुण्यस्य समृद्ध्यर्थं यथेष्टं प्रयतेत।

शिक्षकस्य सफलशिक्षणवृत्तेः यात्रा शिक्षक-शिक्षण-कार्यक्रमे प्रवेशस्य प्रथमदिनादेव प्रारब्धा भवति। एकः भाविशिक्षकः तस्य छात्रावस्थायां येषां गुणानां नैपुण्यानां वा आहरणं कुर्यात् तेषां वर्गीकरणं क्रियते राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मान-द्वारा। अतः यदा भाविशिक्षकः शिक्षणवृत्तौ प्रवेष्टुं निश्चिनोति तदा राष्ट्रियशिक्षक-शिक्षापरिषद् मान्यताप्राप्त-शिक्षक-प्रशिक्षण-संस्थामध्ये तस्य नामाङ्कनं भवति। इदं हि संस्थानं छात्ररूपशिक्षकं शिक्षणवृत्तेः प्रथमं पदं प्राप्तुम् अपेक्षणीय-दक्षताया विषये निर्मितपाठ्यक्रमस्याधारेण शिक्षयिष्यति। एते मानकाः कार्यक्रमस्य पाठ्यक्रमनियोजने वितरणे च सेवापूर्वशिक्षकशिक्षासंस्थाभिः न्यूनतममानकाः भविष्यन्ति। छात्रशिक्षकः स्वस्य प्रारम्भिकशिक्षकप्रशिक्षणे निरन्तरम् अभ्यासेन शिक्षण-अध्ययन-प्रक्रियां सफलतया अग्रे नेतुं मार्गदर्शक-साहाय्येन आवश्यकं ज्ञानं, कौशलं, मूल्यानि, मनोवृत्तीश्च च विकाशयिष्यति।

राष्ट्रिय-शिक्षा-नीतिः २०२० इत्यस्य अयं सिद्धान्तः यत् शिक्षकवृत्तौ प्रवेशाय शिक्षक-योग्यता-परीक्षा (टेट) हि न्यूनतम-योग्यतामानरूपेण परिगणिता भविष्यति। इत्थं शिक्षक-योग्यता-परीक्षया योग्यशिक्षकानां चयनं भविष्यति, तथा शिक्षक-योग्यता-परीक्षा-मानं हि तेषाम् अन्तर्निहित-नैपुण्यस्य प्रमाणं भविष्यति। यदैव नूतनशिक्षकः शिक्षणवृत्तौ प्रविष्टः तदा प्रभृत्येव स राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानाधारित-वृत्तिस्तरेषु उन्नेतुं प्रचोदितः भविष्यति। शिक्षकस्य दक्षतानां निर्णयः कार्यप्रदर्शनसूचकैः (PI) क्रियते यत्तु वृत्तेः कृते स्वीकृतेषु मानकेषु उपलब्धिस्तरं सूचयति। प्रत्येकस्तरीय-नैपुण्यस्य आहरणाय न्यूनतया पञ्च वर्षाणि अपेक्षितानि। शिक्षकस्य गुणवत्ताया आश्वासनं तथा कार्यप्रदर्शनस्य सूचकाः राष्ट्रियमार्गदर्शनमिशन (एनएमएम) कार्यक्रमेन सह सम्बद्धाः भविष्यन्ति तथा च उत्कृष्टशिक्षकाः मार्गदर्शकानां संगोष्ठ्यां समाविष्टाः भवेयुः। एतद्धि विविधव्यक्तिषु पारस्परिकाध्ययनाय अवसरं प्रददाति यद्धि तेषां वृत्ति-नैपुण्य-समृद्धये उपकारकं भवति।

शिक्षकाणाम् आहृत-नैपुण्यस्य विचारेण त्रयः स्तरा भवन्ति। यथा -

### १. प्रवीणशिक्षकः

वृत्तिमार्गस्य अस्मिन् स्तरे इदम् अपेक्षितं भवति यत् शिक्षकः तस्य शिक्षण-दक्षतायाः प्रदर्शनविषये स्वतन्त्रः स्यात्। प्रवीणशिक्षकः वृत्ति-अभ्युन्नति-कार्यक्रमेण तथा अभ्यासेन तस्य अर्जितज्ञानस्य विवृद्धये विद्यालयीय-उपदेष्टुः साहाय्यं प्राप्नुयात्। विद्यालयीय-उपदेष्टारः प्रवीणशिक्षकान् तेषां शिक्षणाभ्यासोन्नतये साहाय्यं कुर्युः। यदैव प्रवीणशिक्षकः तस्य आहृत-दक्षतायाः विन्यासरूपकार्यस्य सर्वेत्तोमस्तरं प्रदर्शयति तदा प्रभृत्येव स तस्य मार्गदर्शकैः अग्रिमस्तरे (उन्नत-शिक्षक-

स्तरे) उन्नेतुं प्रचोदितः तथा मार्गदर्शितः भविष्यति। शिक्षकः तस्य अग्रिमवृत्तिस्तरे उन्नेतुं दत्तावसरो भवेत्, अपि च तस्यैव विद्यालयस्तरस्य कृते अग्रिमवृत्तिचरणेन सह सम्बद्धानां प्रमाणानां विकासाय तस्य मार्गदर्शनं कारयिष्यते। यदा शिक्षकः अग्रिमस्य वृत्तिस्तरस्य कृते सज्जः भवति तदा स तेषां कौशलमूल्याङ्कनार्थं उन्नतशिक्षकपदवीं प्राप्तुं च मार्गदर्शनं कारयिष्यते। प्रवीणशिक्षकः पाठ्यक्रमसामग्रीं व्यवस्थितां कर्तुं, संसाधनानाम् चयनं कर्तुं, पाठ्यपुस्तकानां सार्थकरूपेण उपयोगं कर्तुं, छात्राणां कृते अभ्युन्नतिकल्पे पाठ्यक्रमस्य उद्देश्यं पूरयितुं सचेष्टः स्यात्, छात्राणां कल्याणाय तेषां विकासचिन्तया छात्रैः सह समृद्धसम्भाषणं कुर्यात्। स हि शिक्षणस्यावश्यकतां सम्बोधयितुं व्यक्तिगतशिक्षणस्य आवश्यकतां जानीयात्, तदर्थं च तात्कालिक-हितधारकैः छात्रपालकैः विद्यालयपरिचालकैः संवादेन सांविधानिक-गणतान्त्रिक-मूल्यबोधस्य व्यवहारं प्रवर्धयेत्।

### २. उन्नतशिक्षकः

वृत्तेः अस्मिन् स्तरे शिक्षकात् शिक्षण-अध्ययनाभ्यासेन परिपक्वस्य शिक्षणनैपुण्यस्य सर्वोत्तममानम् अपेक्ष्यते। स तु शिक्षण-अध्ययनयोः महत्त्वपूर्णानां कौशलानाम् अनुप्रयोगे अत्यन्ततया समर्थः भवेत्। उन्नतशिक्षको हि सहप्रवीणशिक्षकाणां मार्गदर्शकरूपेण स्वभूमिकाः परिपालयेत्। उन्नतशिक्षकाः तेषाम् अभ्यासार्थं अध्यक्षेण/ प्रधानेन/ वरिष्ठेन प्रतिक्षणम् अवलोकितः भवेत्, अपि च तदनुसारं प्रशिक्षितोऽपि भवेत्। यदैव वृत्तेः परवर्तिनि स्तरे गतः उन्नतशिक्षकः अधिकारी भवति, तदैव स कुशलशिक्षकपदवीं प्राप्तुं मार्गदर्शितः भविष्यति। अस्मिन् स्तरे सः उन्नत-प्रतिष्ठानेन सह कार्यं कर्तुं यथेष्टं जागरूकः भवेत्, विषयक्षेत्रे समृद्धये, नवनवनैपुण्यसमायोजने, नूतनपाठ्यक्रमसामग्र्यां चापि सावधानः भवेत्। छात्राणां तथा शिक्षणस्य सन्दर्भं सम्यगवगत्य स छात्राणां व्यक्तिगतं तथा विविधशिक्षणस्य आवश्यकतां सम्बोधयितुं समर्थः स्यात्, तेषां समस्यानां समाधानेऽपि उद्युक्तः भवेत्। स तु छात्राणाम् अध्ययनस्य आपत्कालीनलक्ष्यस्य दीर्घकालीनलक्ष्यस्य च विषये, तथा विद्यालयस्य अन्तः बहिश्च विविधहितधारकैः सह विविधबाधानां सम्बोधनं कर्तुमपि सज्जः स्यात्।

### ३. कुशलशिक्षकः

अस्मिन् स्तरे शिक्षकाः मार्गदर्शकनैपुण्यस्य उच्चतमस्तरस्य प्रदर्शनं कर्तुम् अपेक्षिताः सन्ति। तथा च अन्येषां शिक्षकाणां दक्षताविवृद्ध्यर्थं सहायतां करिष्यन्ति तथा च विद्यालयस्य व्यावसायिकविकासकार्यक्रमस्य नेतृत्वमपि करिष्यन्ति।

अस्मिन् स्तरे शिक्षकः निरन्तरं तस्य शिक्षणाभ्यासनैपुण्यस्य सामग्रीककार्यक्रमस्य तथा सहशिक्षकाणां ज्ञानार्जनस्य तथा अभ्यासस्य कृते मार्गप्रदर्शकस्य भूमिकायाः उच्चतमस्तरस्य प्रदर्शनं करिष्यति। अपि च, एकः कुशलशिक्षकः निरन्तरं स्वसहकर्मिणां तथा छात्राणां कुशलं स्मारं स्मारं स्वस्य वृत्तिसम्बन्धिज्ञानस्य समृद्धये प्रयासं कुर्यात्। कुशलशिक्षकाः सहकर्मिनिरीक्षणेषु संलग्नाः भविष्यन्ति, स्वस्य परस्य च शिक्षणस्य उत्तरदायिनः भविष्यन्ति। कुशलशिक्षको हि अन्येषां शिक्षकाणां वृत्तेः परिवर्तिनि स्तरे गन्तुं मार्गदर्शनं कुर्यात्। तदर्थं तु तेषाम् अपेक्षितनैपुण्यस्य प्रामाण्यस्य च विषये मार्गदर्शनं भविष्यति। स हिविद्यालयेषु शिक्षणसमुदायस्य विकासेन स्वस्य शिक्षणव्यवहारस्य अन्येषां च शिक्षणव्यवहारस्य उन्नयनार्थं असाधारणक्षमतां प्रदर्शयिष्यति।

## ३. ३ योग्यतायाः वृद्धिः अभ्युन्नतिश्च

प्रत्येकं वृत्तिसम्बन्धिविषयेषु नैपुण्यस्य वृद्धिः विकासश्च सम्भवः अपेक्षणीयश्च। इयं वृद्धिः विकासश्च शिक्षणसम्बद्धासु सर्वासु दक्षतासु प्रवर्तते यथा - ज्ञानं, मनोवृत्तिः, विश्वासाः, कौशलं, प्रवृत्तिः, मूल्यानि, शिक्षणस्य सामग्री/विषयः, छात्राणाम् अवगतिः, शिक्षायाः दार्शनिकलक्ष्याणाम् अवगमनम् चेत्यादिषु। वस्तुतः व्यापकरूपेण तत्र त्रयः मार्गाः एतादृशीं वृद्धिं जनयन्ति-


क. अनुभवः -अनुभवः चिन्तनं च शिक्षकाणां शिक्षणाभ्यासस्य विषये अधिकावगमनं तथा ज्ञानस्य गाम्भीर्यं सम्पादयति तथा च सिद्धान्तानां विश्वासानां च अवगमनं, सन्दर्भस्य, पाठकानां, शिक्षणप्रक्रियायाः च अवगमनं च शैक्षिकलक्ष्याणां च अवगमनं कारयति। प्रथमतया एकस्य शिक्षकस्य सर्वम् अवधानं शिक्षकदिनचर्याभिः तथा विविधकार्यस्थलीयव्यवहारेण साकं परिचितो भवितुं वर्तते यद्धि सर्वासु एव वृत्तिषु समानमेव। शनैः शनैः च इतोऽपि अवसरः प्राप्यते मूलस्य शिक्षादानकार्यस्य करणार्थं यथा सर्वेषां शिक्षार्थिनां शैक्षणिकलक्ष्यस्य प्राप्तिः स्यादिति। सेवापूर्वशिक्षकशिक्षणस्य काले अधिगतस्य सैद्धान्तिकशिक्षणस्य महत्त्वं गुरुत्वं च स्पष्टं भवति अत्र। शिक्षकाः इतोऽपि वृत्तिनैपुण्यं वर्धयन्ति। सर्वे एव शिक्षकाः अनुभवेनैव शिक्षिताः भवन्ति, समृद्धिं च कुर्वन्ति।

ख. प्रसारणं विवृतिश्च -वृत्तिसम्बन्धीयशिक्षणस्य सामाजिकस्वभावः अधुना अधिकाधिकं स्वीकृतः भवति। सहपाठिभिः सहकारिभिः सह वार्तालापं कृत्वा शिक्षणं 'अन्यत्र कथं कार्याणि क्रियन्ते' इत्यादिविषयैः परिचयः, शिक्षकाणां कृते शिक्षणस्य, वृद्धेः च महत्त्वपूर्णाः स्रोतसः सन्ति। संगोष्ठ्यां कार्यशालायां च भागग्रहणं, व्यावसायिकशिक्षासंगोष्ठ्याः प्रतिभागत्वं, शिक्षालयभिन्न-कर्मस्थलेषु सम्बन्धश्च शिक्षकान् चिन्तयितुं तेन शिक्षयितुम् अवसरं प्रददाति।

ग. धारावाहिकी वृत्तिसम्बन्धीयोन्नतिः –कार्यशालाः क्षमतानिर्माणसत्राणि नैपुण्यप्रवर्धनपाठ्यक्रमश्च आन्तर्जालिकाः अथवा सशरीराः, एते तु नूतनज्ञानाहरणाय नूतनदक्षतासम्पादनाय अवसरं प्रददति, यद्धि वृत्तेः अन्यमपि मार्गम् उन्मोचयति। इत्थं च अयं हि एकः गुरुत्वपूर्णः अवसरः नवनवविषयाणां ज्ञानाहरणाय दक्षतानिर्माणाय वा।

## ३.४ राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानम्

साधारणतया मानानि फलप्रदायकरूपेण शिक्षणस्य गुणवत्तां परिभाषयितुं चित्रयितुं च परिलक्ष्यन्ते। ते (शिक्षकाः) "उत्तम-प्रशिक्षणस्य" प्रतिनिधित्वं कुर्वन्ति, तथैव "मानानां पूर्तिः" इत्यस्य याथार्थ्यम् अन्विष्यन्ति। वृत्तिगततया एतेषां मानानां वर्गीकरणं तेषाम् उद्देश्यं तथा आवेदनमाश्रित्य भवति । एतानि मानानि मौलिकपद्धत्यापि ज्ञायन्ते, यत्र सर्वे शिक्षणवृत्तिसम्बन्धीयाः एकत्रिताः भवेयुः उत वा विविधकर्मजीवनस्तरीयाः शिक्षकाः अपि क्रमशः परिलक्षिताः स्युः एभिः, यत्र शिक्षकाणाम् अनुशीलनस्य प्रवीणात् विशेषज्ञस्तरपर्यन्तमेकः मार्गः परिकल्पितः स्यात्।




चित्रम् -२ - वृत्तिसम्बन्धीय-मानानि योग्यताविषये च चित्रोदाहरणम्

राष्ट्रिय-शिक्षा-नीतिः २०२० इत्यस्योद्देश्यपूर्तये, पूर्वोल्लिखितक्षेत्रत्रयं परिव्याप्य मानानि विद्यन्ते, यानि शिक्षकतावृत्तियुक्तानां समग्रजीवनस्य कर्मजीवनविवर्तनस्य व्याप्त्यर्थं विस्तृततया संज्ञायितं कुर्वन्ति। राष्ट्रिय-शैक्षिकानुसंधानस्य प्रशिक्षणस्य च परिषदा (NCERT), राज्य-शैक्षिकानुसंधानस्य प्रशिक्षणस्य च परिषदा (SCERT), सर्वस्तरस्य स्थानस्य च शिक्षकैः, शिक्षकप्रस्तुतेः अभ्युन्नतेश्च विशेषज्ञसंस्थानैः, विशेषज्ञसंस्थाभिः, उच्चशिक्षासंस्थाभिश्च सह विमृष्य राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य एका साधारणनिर्देशिका सम्पादिता।

# ४. राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य प्रारूपम्

राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मान-प्रारूपं कर्मजीवनस्य मात्रां शिक्षकाणां कार्यस्य निर्दिष्टक्षेत्रमाध्यमेन वर्णयितुं शक्यते। प्रारूपमिदं निम्नोक्तान्तःसम्पर्कितक्षेत्रत्रितये सुसज्जितं, यत् 'मानम्' इति नाम्ना ख्यातं, यत् मानं वर्णनानुसारं विविधक्षेत्रं परिव्याप्नोति।

**४.१ प्रथममानम् - मौलिकमूल्यबोधाः नैतिकताश्च** - मानमिदं मौलिक-मूल्यबोधसम्पर्कितं तथा नैतिकतासम्पर्कितं क्षेत्रं परिव्याप्नोति येषां मूल्यबोधानां समुन्नतिसाधने एकः शिक्षकः इति अपेक्षते। शिक्षणवृत्तौ मौलिकमूल्यबोधानां नैतिकतानाञ्च गुरुत्वपूर्णा भूमिका विद्यते। एते मूल्यबोधाः तत्त्वावधायकनीतिरूपेण सेवन्ते, यत् शिक्षकमूल्यबोधानां वृत्तिसम्बन्धीयाभ्युन्नतेः रूपं ददाति यथा सत्यशीलता, प्रामाणिकता, सन्मानम्, विश्वासः, श्रेणिकक्षायां पारस्परिकसम्पर्कस्य प्रतिश्रुतिः, शिक्षकाणां शिक्षागतदक्षता, जीवनव्याप्यशिक्षणं परिमार्जयितुं सहायतां करोति। एतेषां मूल्यबोधानां नैतिकतानाञ्च दृढं स्थापनमाध्यमेन शिक्षकाः समतायाः तथा निर्मान्ति ।




चित्रम् ३ - मौलिकमूल्यबोधविषये तथा नैतिकताबोधविषये चित्रोदाहरणम्

**४.२ द्वितीयमानम् - ज्ञानम् अभ्यासश्च** - प्रत्येकं कर्मजीवनस्तरे कार्यकारितया कर्मसम्पादनाय विद्यार्थिविषये, शिक्षण-शिक्षा-विषये एकस्मिन् शिक्षके ज्ञानम्, अवबोधः कार्यञ्चेत्यादिकं यदपेक्षणीयं, तद्विषयं परिव्याप्नोति मानमिदम्। अपि च, शिक्षणाध्ययनप्रक्रिया तथा शिक्षणस्य मूल्याङ्कनकाले मानमिदं वर्णयति कथम् एकः शिक्षकः शिशूनां कृते शिक्षणानुभवं यथोपयुक्ततया सज्जीकरोति। शिक्षकाणां ज्ञानम् अभ्यासश्च विस्तृतः तथा विषयवस्तुज्ञानं, शिक्षाशास्त्रीयज्ञानविषयः, विषयवस्तूपस्थापनोपायज्ञानं, शिक्षोद्देश्यज्ञानं, जातीयशिक्षाव्यवस्था, नीतिः, इतिहासः, अध्ययनतथ्यस्य ज्ञानं, विद्यार्थिप्रासङ्गिकनिर्दिष्टज्ञानं, शिक्षागतानुशीलनस्य ज्ञानं चेत्यादिकम् अस्मिन् क्षेत्रे अन्तर्याति। ज्ञानम् अभ्यासश्च

'करणीयम्' इत्यस्य कृते सामर्थ्यं स्वभावञ्च नियोजयति, तथा च विद्यार्थिनां विशेषतया यथार्थतया च नियोक्तुं, परिकल्पयितुं, शिक्षयितुं, मूल्याङ्कयितुं, प्रतिफलितुम्, उन्नतिं तथा व्यवहृतसम्पदां चेतुं, विविधकार्यक्रमस्यान्तर्जाले शिक्षणानुभवस्य, श्रेणिकक्षायाः, ग्रन्थागारस्य, रसायनकर्मशालायाः, स्थानान्तरनिरीक्षणस्य, उपकक्षाणां, क्रीडाप्राङ्गणस्य च परिकल्पनां रचयितुं, तथा च सामग्रिकतयाभ्युन्नतये सर्वेषां विद्यार्थिनां समर्थने सहायतां करोति।




चित्रम् ४ - ज्ञानम् अभ्यासश्चेति विषये चित्रोदाहरणम्।

**४.३ तृतीयमानम्-वृत्तिसम्बन्धीया वृद्धिः अभ्युन्नतिश्च** - प्रत्येकं कर्मजीवनस्तरे कार्यकारितया कर्मसम्पादनाय विद्यार्थिविषये, शिक्षण-शिक्षा-विषये एकस्मिन् शिक्षके वृत्तिसम्बन्धीयज्ञानस्य/योग्यतायाः समुन्नतिः - यदपेक्षणीयं, तद्विषयं परिव्याप्नोति मानमिदं, नियत-वृत्तिसम्बन्धीयाभ्युन्नतिमूलककार्यक्रमे अंशग्रहणमाध्यमेन। शिक्षणयोग्यतायाः वृद्ध्यर्थम् अभ्युन्नत्यर्थं च वृत्त्यनुसारं शिक्षकैः वृत्तिं प्रति तथा उद्यमं प्रति गुरुत्वं प्रदेयम्। योग्यतायाः व्यवहारोपयोगिपरिभाषायां सुस्पष्टानुसारं यत् अस्मिन् लेखपत्रे व्यवहृतं विद्यते तत् ज्ञानस्य, स्वभावस्य, दक्षतायाश्च सर्वाणि रूपाणि परिव्यप्नोति।

चित्रम् - ५, ५. वृत्तिसम्बन्धीययाः अग्रगतेः उन्नतेश्च विषये चित्रोदाहरणम्।



| प्रथममानम् - मौलिकमूल्यबोधाः नीतिबोधाश्च | | | |
|---|---|---|---|
| एकस्मिन् शिक्षके अपेक्षितः मुख्यमूल्यबोधानां वृत्तिसम्बन्धीय- नैतिकतानाञ्च प्रकाशः । | | | |
| **क्षेत्रम्** | **प्रवीणः शिक्षकः** | **उन्नतः शिक्षकः** | **कुशलः शिक्षकः** |
| सांविधानिकमूल्यबोधाः यथा भारतीय-संविधाने संरक्षिताः | सांविधानिकमूल्यबोधप्रसङ्गे युक्तौ, अग्राधिकारे, चिन्तने, व्याख्यायां च सक्षमता। | | |
| | नैतिकतानुसारं दायित्वानुसारं च तथ्यव्यवहारस्य तथा च विद्यार्थिनां मर्यादानिश्चये सक्षमता। | | |
| | भारतीय-संविधाने ५१ ए - अनुच्छेदे प्रदत्तमौलिककर्तव्यस्य सचेतनता तथा अनुशीलनञ्च। | | |
| | विरोधमूलकपरिस्थितौ विधयः, नियमाः, प्रविधानानि, नीतयः चेत्यादीनां नैतिकतानुसारं कारणानुधावने तथा प्रतिकूलपरिवेशे आलोचनायाः सक्षमता। | | |
| वृत्तिसम्बन्धीयाः सम्बन्धाः | वृत्तिसम्बन्धीयाः सम्बन्धाः | | |
| | विद्यार्थिनां कृते सहपाठ्यक्रमसौविध्यस्य प्रारम्भाय अन्यवृत्तिशीलैः संस्थाभिश्च मध्यस्थता करणीया। | | |
| | विद्यार्थिनां कृते सहपाठ्यक्रमसौविध्यस्य प्रारम्भाय अन्यवृत्तिशीलैः संस्थाभिश्च मध्यस्थता करणीया। | | |
| | बालकानां समग्रतया विकाशाय मातृपितृणां भूमिकायाः स्वीकरणम्, अवगमनञ्च। | | |
| | सम्पदादिसम्प्रदानाय स्वविद्यालयेन सह अन्यप्रतिष्ठानस्य, सम्प्रदायस्य च मिथः सम्बन्धस्थापने सक्षमता। | | |

| द्वितीयमानम् - ज्ञानम् अभ्यासश्च । | | | | |
|---|---|---|---|---|
| श्रेणिकक्षायां कार्यकारिशिक्षाशास्त्रीयानुशीलनस्य दृष्ट्या एकस्मिन् शिक्षके ज्ञानम्, अवबोधः कार्यञ्चेत्यादिकं यदपेक्षणीयम् । | | | | |
| क्षेत्रम् | उपक्षेत्रम् | प्रवीणः शिक्षकः | उन्नतः शिक्षकः | कुशलः शिक्षकः |
| प्रत्येकशिशूनाम् अनन्यदक्षतायाः स्वीकृतिः, प्रत्यभिज्ञानं, लालनञ्च । | शिशोः विकाशः तथा शिक्षायाः प्रभावश्च | विकाशस्य भिन्नस्तरसम्बन्धिततथ्यानां भिन्नक्षेत्रसम्बन्धित-तथ्यानाम् (ज्ञानात्मकं, भाषागतं सामाजिकं भावनात्मकं शारीरिकं च) अवगमनम् । | शिक्षणपद्धतेः चिह्नितकरणाय तथा एकैकशो विकाशाय च ज्ञानस्य प्रयोगः तथा शिशुविकाशस्यावबोधश्च करणीयः । | सतीर्थानां कृते शिशुविकाश-तथ्यानाम् आदर्शप्रयोगः । |
| | विद्यार्थि-वैचित्र्यम् | भिन्नप्रकारस्य विद्यार्थिवैचित्र्यस्य (शिक्षणशैल्याः, शिक्षणस्य आवश्यकतायाः, आर्थ-सामाजिक-स्थितेः, संस्कृतेः, भाषायाः, पारिवारिकस्थितेश्च) स्पष्टबोधस्य विकाशः तथा तेषां विद्यालयेषु कक्षासु च प्रयोगः करणीयः । | विद्यार्थिनां विविधप्रयोजनानां पूर्तये, तथा व्यापककक्षायाः निर्माणाय शिक्षणसम्पदः ज्ञानस्य अनुप्रयोगः । | कक्षायाः अनुभवानुसारं प्रत्येकशः छात्राणां विविधानाम् आवश्यकतानां निदानं सम्बोधनं च कर्तुं सक्षमता । |
| | प्रतिबन्धिविद्यार्थिनां तथा मेधाविविद्यार्थिनाम् | भिन्नप्रकारस्य अक्षमता, तस्याश्च विशेषरूपेण शिक्षणस्य | कक्षायां विभिन्नानां विद्यार्थिनाम् आकाङ्क्षाणां चिह्नितकरणाय | विशिष्टप्रयोजनस्य चिह्नितकरणसक्षमता, या विशेषज्ञानां सहयोगिताम् |

| द्वितीयमानम् - ज्ञानम् अभ्यासश्च। | | | | |
|---|---|---|---|---|
| श्रेणिकक्षायां कार्यकारिशिक्षाशास्त्रीयानुशीलनस्य दृष्ट्या एकस्मिन् शिक्षके ज्ञानम्, अवबोधः कार्यञ्चेत्यादिकं यदपेक्षणीयम्। | | | | |
| क्षेत्रम् | उपक्षेत्रम् | प्रवीणः शिक्षकः | उन्नतः शिक्षकः | कुशलः शिक्षकः |
| | अध्ययनस्य प्रयोजनम्। | प्रयोजनीयता, अपि च प्रतिभावतां शिशूनां शिक्षणस्य प्रयोजनीयतायाः समर्थनं तथा शिक्षणस्य कृते नूतनकौशलस्य आविष्करणम्। | सम्बोधनाय च विशिष्टप्रयोजनीयज्ञानस्य अनुप्रयोगः। | अपेक्षते, तथा च कस्यामपि परिस्थितौ कथमभिगमनं करणीयं तद्विषये सतीर्थेभ्यः तथ्यं प्रदानीयम्। |
| विषयस्य ज्ञानम्, धारणागतावगमनं तथा प्रयोगश्च | | विषयं प्रति गभीरज्ञानस्य, अवबोधस्य, प्रयोगस्य च दक्षताप्रदर्शनम्। | आन्तस्तथान्त-र्विषयाणां विषयवस्तुनः संयोगः प्रयोज्यः तथा च स्थानीयज्ञानस्य देशीयज्ञानस्य च समेकीकरणीयम्। | विषयस्योन्नत्या साकम् अद्यतनता स्थापनीया, तथा च पाठ्यक्रमनिर्वाहे नूतनधारणायाः समागमनं स्यात्। |
| पाठ्यक्रमः | पाठ्यक्रम-रूपरेखा | विषयगतपाठ्यक्रमस्य पाठ्यक्रमरूपरेखायाश्च लक्ष्याणां सुस्पष्टबोधस्य विकाशः। | आन्तस्तथान्तर्विषयाणां पाठ्यक्रमगतसंयोगस्य अवबोधाय तथा विकाशाय सहकर्मिभिः सह सहकार्यं करणीयम्। | नवीनतमविकाशान् तथा नूतनज्ञानं विचार्य्य पाठ्यक्रमनिर्वाहस्य परिवर्तनं विधेयम्। |

| द्वितीयमानम् - ज्ञानम् अभ्यासश्च। | | | | |
|---|---|---|---|---|
| श्रेणिकक्षायां कार्यकारिशिक्षाशास्त्रीयानुशीलनस्य दृष्ट्या एकस्मिन् शिक्षके ज्ञानम्, अवबोधः कार्यञ्चेत्यादिकं यदपेक्षणीयम्। | | | | |
| क्षेत्रम् | उपक्षेत्रम् | प्रवीणः शिक्षकः | उन्नतः शिक्षकः | कुशलः शिक्षकः |
| विद्यार्थिनामध्ययनाय सूचिपत्रगतविषयस्य अभ्युन्नतिः | निर्देशात्मकाः / शिक्षाशास्त्रीय-नीतयः शिक्षणवर्गीकरणानि च। | सामान्यनिर्देशात्मकनीतीनाम्, शिक्षणवर्गीकरणानां शिक्षाक्षेत्रे नियुक्तेः, सामान्यशिक्षाशास्त्रीयपद्धत्याः सम्पदाञ्चावगमनम्। | स्वविषये स्वशिक्षाक्षेत्रे वा शिक्षणस्य वर्गीकरणेन शिक्षागतकौशलस्य प्रणयनमाध्यमेन च उन्नतरूपेणोपयुक्तशिक्षणलक्ष्यस्य शिक्षणपरिणामस्य वा विकाशः करणीयः। | आकर्षकानुशीलनस्य परिकल्पनायाः निर्माणाय शिक्षणतथ्यस्य चयने, निर्देशात्मककौशलग्रहणे शिक्षाशास्त्रीयकौशलग्रहणे वा शिक्षणवर्गीकरणे सहकारिणं सहयोगः करणीयः। |
| | विविधनिर्देशः/ विविधशिक्षणम् | भिन्ननिर्देशिकायाः/ भिन्नशिक्षणकौशलस्य, तथा च शिक्षणे शिक्षार्थिनां भागग्रहणप्रवृत्तिवृद्धये तेषां भूमिकाविषये सुस्पष्टावगमनं बोधप्रदर्शनं च करणीयम्। | शिक्षायां शिक्षार्थिनां व्यापृतकरणाय भिन्ननिर्देशिकायाः अनुप्रयोगः। | विद्यार्थिनाम् अभ्युपगमवर्धनाय उन्नतोपयुक्तभिन्नकार्यक्रमस्य कौशलस्य च निर्माणे सहकारिणं सहयोगिता करणीया। |
| | सूक्ष्मचिन्तनं, सर्जनात्मकचिन्तनं तथा च उच्चनिर्देशात्मकचिन्तनकौशलसदृशजीवनकौशलस्य विकाशाय नीतयः उपकरणानि च। | सामान्यशिक्षागतकौशलानां प्रति गभीरोपलब्धिप्रदर्शनं, यत् समालोचनात्मकस्य सर्जनशीलचिन्तायाः तथा अन्योच्चतरचिन्तायाश्च दक्षतां विकाशते । | विशिष्टकौशलस्योन्नतये उपयुक्तशिक्षाशास्त्रीय कौशलस्य व्यवहारः। | शिक्षाक्षेत्रे साम्प्रतिककालिकोन्नतशिक्षाव्यवस्थानुसारं शिक्षाशास्त्रीयकौशलानां निर्माणं करणीयम्। |

| द्वितीयमानम् - ज्ञानम् अभ्यासश्च। | | | | |
|---|---|---|---|---|
| श्रेणिकक्षायां कार्यकारिशिक्षाशास्त्रीयानुशीलनस्य दृष्ट्या एकस्मिन् शिक्षके ज्ञानम्, अवबोधः कार्यञ्चेत्यादिकं यदपेक्षणीयम्। | | | | |
| क्षेत्रम् | उपक्षेत्रम् | प्रवीणः शिक्षकः | उन्नतः शिक्षकः | कुशलः शिक्षकः |
| शिक्षायाः परिकल्पनाः | शिक्षायाः लक्ष्याणि उद्देश्यानि च | परिमापयोग्यस्य आहरणयोग्यस्य च शिक्षणलक्ष्यस्य उद्देश्यस्य चावगमनम्। | पाठ्यक्रमरूपरेखया सह संगतिपूर्णविषयस्य कृते परिमापयोग्यस्य सम्पादनयोग्यस्य च शिक्षणलक्ष्यं शिक्षणोद्देश्यं च निर्मापयताम्। | लभ्ययोग्यलक्ष्याणि, विद्यार्थिनां भिन्नप्रयोजनीयतापूर्तीन्, तथा च समग्रविकाशं विचार्य्य उच्चापेक्षाणां तथा उन्नताह्वानानां सज्जीकरणसक्षमता। |
| | अध्ययनानुभवस्य परिकल्पना | विशिष्टशिक्षणोद्देश्यस्य कृते शिक्षणपरिकल्पनाविकाशे सक्षमता। | एकैकशःशिक्षार्थिनां प्रयोजनानि एकत्रीकृत्य भिन्नप्रकारकशिक्षणयोजनानां निर्माणम्। | पाठ्यक्रममाधारीकृत्य आन्तःसम्बन्धीयशिक्षणपरिकल्पनायाः निर्माणसक्षमता। |
| शिक्षणस्य, शिक्षणाय, शिक्षकरूपेण च मूल्याङ्कनम्। | मूल्याङ्कन-कौशलानि। | भिन्नप्रकारकमूल्याङ्कन कौशलानाम् उपकरणानां चावगमनम्। | विद्यार्थिशिक्षायाः प्रयोजनानुसारं यथोपयुक्तमूल्याङ्कनकौशलस्य चयनम्। | पाठ्यक्रममाधारीकृत्य आन्तःसम्बन्धीयशिक्षणपरिकल्पनायाः निर्माणसक्षमता। |
| शिक्षायां प्रयुक्तेः व्यवहारः अन्तर्भुक्तिकरणञ्च। | मूल्याङ्कन-तथ्यम्। | मूल्याङ्कनतथ्यात् छात्राणाम् अन्तर्निहितप्रतिभायाः ज्ञानम्। | लक्ष्यस्थिरीकरणाय शिक्षणपरियोजनानिर्माणाय च मूल्याङ्कनतथ्यस्य व्यवहारः। | संस्थानात्मके, राज्ये, राष्ट्रियस्तरे च मूल्याङ्कननीतीनां ज्ञानस्य प्रदर्शनम्। |

| द्वितीयमानम् - ज्ञानम् अभ्यासश्च । | | | | |
|---|---|---|---|---|
| श्रेणिकक्षायां कार्यकारिशिक्षाशास्त्रीयानुशीलनस्य दृष्ट्या एकस्मिन् शिक्षके ज्ञानम्, अवबोधः कार्यञ्चेत्यादिकं यदपेक्षणीयम् । | | | | |
| क्षेत्रम् | उपक्षेत्रम् | प्रवीणः शिक्षकः | उन्नतः शिक्षकः | कुशलः शिक्षकः |
| | सम्पर्कः प्रतिक्रिया च । | छात्रैः छात्रपालकैश्च सह छात्राणाम् अग्रगतिविषये पर्यालोचना करणीया, तथा च अग्रगतेः प्रतिक्रियापि प्रदातव्या तेभ्यः । | विद्यार्थिनाम् अग्रगतेः निर्दिष्टप्रतिक्रिया तदीयाभिभावकैः परिपालकैश्च सह पर्यालोचनीया । | विद्यार्थिनां/ श्रेणिकक्षायाः अग्रगतेः एकीभूतदृष्टिनिर्माणाय, तथा च यथोपयुक्त-प्रतिकारमाध्यमेन शिक्षायाः समर्थनाय अन्यस्मात् स्रोतसः तथ्यसमूहस्य व्यवहारः । |
| | | शिक्षाक्षेत्रे प्रयुक्तेः भूमिकायाः अवबोधः । | शिक्षणशिक्षायाः, मूल्याङ्कनस्य श्रेणिकक्षपरियोजनायाः समर्थनाय सूचनायास्तथा संचारस्य प्रौद्योगिक्युपकरणस्य व्यवहारः करणीयः । | छात्रशिक्षणानुशासन विषये पालकान् साम्प्रदायिकसदस्यान् च सहयोगः करणीयः । |

| द्वितीयमानम् - ज्ञानम् अभ्यासश्च। | | | | |
|---|---|---|---|---|
| श्रेणिकक्षायां कार्यकारिशिक्षाशास्त्रीयानुशीलनस्य दृष्ट्या एकस्मिन् शिक्षके ज्ञानम्, अवबोधः कार्यञ्चेत्यादिकं यदपेक्षणीयम्। | | | | |
| **क्षेत्रम्** | **उपक्षेत्रम्** | **प्रवीणः शिक्षकः** | **उन्नतः शिक्षकः** | **कुशलः शिक्षकः** |
| श्रेणिकक्षायाः उपादानं गतिशीलता च। | सुरक्षितः, परिपोषकः, सहायकश्च शिक्षणपरिसरः। | सुरक्षितं परिव्यापकं च श्रेणिकक्षं निर्मातुं सौविध्यानां संसाधनानाञ्च आयोजनं करणीयम्। | फलप्रदायकं तथा समर्थनयोग्यशिक्षणपरिसरं सज्जीकरणीयम्, यत्र आशावर्धकाः छात्राः भीतिहीनतया स्वमतं प्रकटयिष्यन्ति। | सुरक्षितश्रेणिकक्षायाः परिव्यापकश्रेणिकक्षायाः च विकाशे छात्राणां नियुक्तिः। |
| | श्रेणिकक्षायाः परियोजना। | श्रेणिकक्षापरियोजनापद्धतीनां ज्ञानं तथा तेषाम् उपयोगक्षमतायाश्च प्रदर्शनम्। | विद्यार्थिनाम् आचरणस्य वैचित्र्यम् अवबोधनीयं, तथा च संयोजनीयम्। | विद्यार्थिषु आत्मानुशासनस्य, व्यक्तिगतदायित्वस्य, नेतृत्वस्य च विकाशः साधनीयः। |
| | फलप्रदायक-श्रेणिकक्षा-सम्भाषणम्। | भिन्न-वाचनिक-अवाचनिक-श्रेणिकक्ष-सम्भाषण-कौशलस्य अवबोधे दक्षतायाः आहरणम्। | शिक्षणं भागग्रहणमूलकं कर्तुं भिन्न-वाचनिक-अवाचनिक-श्रेणिकक्ष-सम्भाषण-कौशलस्य व्यवहारः प्रतिवचनञ्च करणीयम्। | सहकारिभ्यः श्रेणिकक्षासम्भाषणस्य उन्नतौ समर्थनाय तथा मार्गदर्शनाय निर्माणमूलकप्रतिक्रियायाः प्रदानम् आवश्यकम्। |
| | भाषावैचित्र्यं बहुभाषिकता च। | भाषावैचित्र्यं तथा प्रासङ्गिकभाषासु दक्षताम् अनपेक्ष्य समेषां शिशूनां प्रति समभावं प्रदर्शनीयम्। | शिक्षणस्य विद्यायाश्च सौविध्यर्थं श्रेणिकक्षायां बहुभाषिकतायाः नियुक्तौ सहकारिणः समर्थनं करणीयम्। | सतीर्थेषु शिक्षणस्य शिक्षायाश्च सौकर्यार्थं बहुभाषिकतायाः व्यवहारः प्रातिनिध्येन करणीयः। |

| तृतीयमानम् - वृत्तिसम्बन्धीयवृद्धिः अभ्युन्नतिश्च | | | |
|---|---|---|---|
| वृत्तिसम्बन्धीयानुशीलनस्य वृद्धौ अभ्युन्नतौ च सक्षमता। | | | |
| **क्षेत्रम्** | **प्रवीणः शिक्षकः** | **उन्नतः शिक्षकः** | **कुशलः शिक्षकः** |
| अध्ययनस्य प्रयोजनम् | अध्ययनप्रयोजनस्य चिह्नितकरणं, तथा आत्मनो वृत्तियोग्यतायाः विकाशे लक्ष्यस्थापनम्। | विशेषज्ञसकाशात् प्राप्ततथ्यानुसारम् एका वृत्तिसम्बन्धीयोन्नतपरिकल्पना निर्माणीया। | परिकल्पनायाः तथा च सहकारिभ्यः वृत्तिसम्बन्धीयोन्नतावसरस्य प्रदानम् |
| प्रतिफलितानुशीलनम् | प्रतिफलितानुशीलनात्मकावबोधस्य प्रदर्शनम् | आत्मनः शिक्षणाभ्यासस्य अभिसंनमनाय प्रतिफलितानुशीलनस्य करणीयः। | प्रतिफलितानुशीलनस्य प्रयोगे सहकारिणं समर्थनं/ मार्गदर्शनं वा करणीयम्। |
| अध्ययनसम्प्रदाये नियुक्तिः भागग्रहणञ्च । | विद्यालयाभ्यन्तरे बहिस्थे च अध्ययनावसरे भागग्रहणम्। | सम्मेलने, चर्चासत्रे, आन्तर्जालिकचर्चासत्रे च तेषाम् अनुसन्धानम् अध्ययनञ्च उपस्थापनीयम्। | विद्यालयमध्ये अध्ययनसम्प्रदायस्य नियुक्तिः तथा वृत्तिसम्बन्धीयोन्नतेः सत्रस्यायोजनम्। |

# ५. कार्यसाधनम्

राष्ट्रिय-शिक्षकीय-योग्यता-संस्थानं हि एकमङ्कीयसंस्थानं, यत् राष्ट्रिय-शिक्षक-शिक्षापरिषदि संस्थापितं, यत्र च शिक्षकाणां निधिर्भविष्यति, तथा च यत् राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य सञ्चालनायाः भारवाहकं भविष्यति, किञ्च, विशेषज्ञानां/कार्यसाधनसंस्थानानां योग्यतावर्धनकार्यक्रमं करिष्यति। राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य मार्गदर्शकालेखस्य वास्तविकतायास्तथा प्रभावस्य च मूल्याङ्कनम् आभारतं व्याप्य ११७५ संख्यकशिक्षकैः सह ७५ (२५ केन्द्रीय-विद्यालय-संस्थाः + २५ नवोदय-विद्यालय-समितयः + २५ केन्द्रीय-माध्यमिक-शिक्षा-संस्थाः) संख्यक-केन्द्र-सर्वकार-शासनाधीने विद्यालये परीक्षामूलकगवेषणामाध्यमेन संजातम्। अधोलिखितानि प्रायोगिककार्यक्रमस्य उद्देश्यानि सम्प्राप्तानि -

- शिक्षकाणां योग्यतास्तरस्य कर्मजीवनस्तरस्य च चिह्नितकरणम्।
- शिक्षकाणां कौशलेषु/ दक्षतासु तथा शिक्षणानुशीलने राष्ट्रिय-शिक्षक-वृत्तिसम्बन्धीय-मानस्य मार्गदर्शकस्य प्रभावस्य परिमाणम्।
- राष्ट्रिय-शिक्षक-वृत्तिसम्बन्धीय-मानस्य कार्यसाधनीयकौशलविषये विशेषज्ञसकाशात् प्रतिक्रियायाः संग्रहणम्।

## ५.१ कार्यपरिकल्पना

राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य सामर्थ्यं विद्यते शिक्षायाः आमूलपरिवर्तयितुं सुस्पष्टतया मानानि परिभाषयतः शिक्षकगुणानां चित्रप्रदर्शनमाध्यमेन तथा च शिक्षकाणां योग्यतावर्धनाय उन्नतमार्गस्यैकस्य प्रस्तावमाध्यमेन। कार्यान्वयनयोजनायाः परिकल्पना संजाता, किञ्च, राष्ट्रिय-शिक्षक-वृत्तिसम्बन्धीय-मानस्य मार्गदर्शनकाले परीक्षापि सुसम्पन्ना सम्यक्तया। अधोलिखिताः पदक्षेपाः अस्मिन् कार्यसाधनविधाने अन्तर्निहिताः सन्ति -

- लक्ष्यसमूहस्य पञ्जीकरणम्
- मानानाम् अनुप्रयोगः - शिक्षकाणां कर्मजीवनस्तरस्य चिह्नितकरणम्
- गुणगतमूल्याङ्कनम्।

राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानानुसारं शिक्षकस्यैकस्य समग्रशिक्षणकर्मजीवनं व्याप्य शिक्षणकौशलस्य योग्यतायाश्च विकाशः प्रयोजनीयः। शिक्षकाः आत्ममूल्याङ्कनोपकरणैः तथा च अन्येषां मूल्याङ्कनोपकरणैः तदीययोग्यतायाः वर्णने सक्षमाः भविष्यन्ति। वैधिकमूल्याङ्कने अन्तर्भुक्ताः भविष्यन्ति - शिक्षकस्य योग्यतायाः विकाशः, शिक्षणाग्रगतेः प्रमाणं, श्रेणिकक्षप्रदर्शनं (प्रदर्शनानि), विशेषज्ञानां प्रतिक्रिया (३६० डिग्रीरूपेण), तथा/वा पर्यवेक्षणप्रतिवेदनानां सग्रहणं सतीर्थस्य मार्गदर्शकस्य च सकाशात्। कार्यप्रदर्शनसूचकानाम् (PI) इत्यादीनां संरूपसहितमूल्याङ्कनाय साधनानि षष्ठाध्याये प्रदत्तसूचनामूलकमूल्याङ्कनरूपरेखानुसारं विकशितुम् अर्हन्ति।

राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मान-प्रवर्तिता कार्यपरियोजना निम्नलिखितरूपेण अस्ति-

क. राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य मार्गदर्शकालेखपत्रस्य समारम्भः, तथा कार्यान्वयनार्थं उत्तरदायिसंस्थानानां योग्यतानिर्माणम्।

ख. राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य मार्गदर्शकालेखपत्रस्य राज्यानां/केन्द्रशासितप्रदेशानां वा संयोजनम्।

ग. राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य शिक्षकीय-वृत्तियोग्यतायाः विकाशः, योग्यता-निर्माणं, शिक्षणं चेत्यादिभिः सह एकीकरणं, यथा राष्ट्रिय-शिक्षा-नीतिः २०२० इत्यस्मिन् ५.२० अनुच्छेदे परिकल्पितं विद्यते।

घ. शिक्षकाणां यथार्थशिक्षणयोग्यताप्राप्त्यर्थं सम्पदः/उपकरणानां/स्वकीयोन्नतेः निर्देशिकायाः/ मूल्याङ्कनोपकरणस्य उन्नतिः आवश्यकी।

## ५.२ प्रयोज्यता

क. राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य उपयुक्तराज्यसर्वकारेण/ केन्द्रशासितसर्वकारेण वा चितसंस्थाद्वारा कार्यान्वितं भाविष्यते, अपि च, केन्द्रीयशासनाधीनसंस्थानां विषयेऽपि तथैव भविता।

ख. यथोपयुक्ता मनोनीता संस्था (केन्द्रस्य / राज्यस्य) एकविशदीकृतपद्धतेः प्रणयणं करिष्यति, अपि च, शिक्षकाणां वृत्तिसम्बन्धीयविकाशाय कर्मजीवनसंचालनाय च राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य मार्गदर्शिकालेखेन सह वास्तवायनस्य तथा एकीकरणस्य निर्देशनां प्रदास्यति।

ग. यथोपयुक्तसर्वकारः राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मान-संस्थायां राष्ट्रियशिक्षक-शिक्षापरिषदा सम्बन्धस्थापनस्योद्देश्ये एकस्य स्थानीयाधिकारिकस्य नियुक्तिं करिष्यति।

घ. राष्ट्रियशिक्षक-शिक्षापरिषद् स्थानीयाधिकारिकाणां कृते आलोचनासभायाः कार्यक्रमस्य वा समायोजनं करिष्यति।

ङ. राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानम् इत्यस्य कार्यान्वयने प्रत्येकं मनोनीतसंस्थाः दायित्वशीलाः भविष्यन्ति राष्ट्रियशिक्षकः शिक्षापरिषदा सह विशदरूपेण वण्टनाय।

च. राष्ट्रियशिक्षक-शिक्षापरिषद् तथ्यसमूहानां संरक्षणं करिष्यति, तथा च विशेषज्ञानां सम्पदाम् उपकरणानां च निधानम् भविष्यति, किञ्च, तेषां यथोपयुक्तसर्वकारेण/संस्थया वा सह पर्यालोचनां करिष्यति।

छ. राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य शिक्षकीय-वृत्तियोग्यतायाः विकाशैः, समग्रभारतं व्याप्य कर्मजीवनपरियोजनाभिः सह एकीकरणं, यथा राष्ट्रिय-शिक्षा-नीतिः २०२० इत्यस्मिन् ५.२० अनुच्छेदे परिकल्पितं विद्यते।

## ५.३ पर्यायि-समीक्षा

मानदण्डस्य कार्यकारितायाः दृढपरीक्षणमूलकविश्लेषणं समाश्रित्य वृत्तिसम्बन्धीयमानानां पर्यायिक्रमेण समीक्षा तथा पुनः परिशीलनं भविष्यति।

# ६. राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य रूपरेखानुसारं मूल्याङ्कनसाधनानि

**प्रथममानम् - मौलिकमूल्यबोधाः नीतिबोधाश्च**

| |
|---|
| क्षेत्रम् १ सांविधानिकमूल्यबोधाः यथा भारतीयसंविधाने विधिबद्धाः । |
| **उपक्षेत्रम् १.१ सांविधानिकमूल्यबोधप्रसङ्गे युक्तौ, अग्राधिकारे, चिन्तने, व्याख्यायां च सक्षमता।** |
| १.१.१. सर्वे विद्यार्थिनः सहकर्मिणश्च श्रद्धया साम्यतया च गण्याः।<br>१.१.२. सुरक्षितपरिवेशसर्जनेन सर्वेषु ऐकतां साम्यतां वर्धयति, यत्र जनाः भीतिहीनतया स्वविचारान् भावनाश्च प्रकाशयितुं शक्नुवन्ति। |
| **उपक्षेत्रम् १.२ नैतिकतानुसारं दायित्वानुसारं च तथ्यव्यवहारस्य तथा विद्यार्थिनां मर्यादानिश्चितकरणे सक्षमता।** |
| १.२.१. - विद्यार्थिविषयकतथ्यं संरक्षति, तथा आधिकारिकाणां विशेषप्रयोजनमन्तरेण तथ्यस्य भागं न करोति। |
| **उपक्षेत्रम् १.३ भारतीय-संविधाने ५१ ए - अनुच्छेदे प्रदत्तमौलिककर्तव्यस्य सचेतनता तथा अनुशीलनञ्च।** |
| १.३.१. सक्रियरूपेण सर्वेषु विद्यार्थिषु अस्माकं देशं प्रति प्रेमभावं, तथा अस्माकं देशस्य समृद्धं वैचित्र्यं च प्रति गर्वभावं जागरयति।<br>१.३.२. पर्यावरणरक्षायै, वैज्ञानिकसम्मतप्रकृतिरचनायै, राष्ट्रियाभ्युन्नतये अवदानाय च विद्यार्थिनः प्रोत्साहयति। |
| **उपक्षेत्रम् १.४.** विरोधमूलकपरिस्थितौ विधिः, नियमाः, प्रविधानं, नीतिः नैतिकतानुसारं कारणानुधावनं तथा प्रतिकूलपरिवेशे आलोचनायाः सक्षमता। |

| |
|---|
| १.४.१ प्रयत्नतया राज्यस्य विधिम् अनुसरति, तथा तासां विधीनाम् उपेक्षा तथा अननुसरणस्य परिणामविषये सचेतनेन भाव्यम्।<br>१.४.२ विद्यार्थिनां सहकर्मिणाञ्च विधेरनुसरणाय प्रोत्साहयति समस्यायाः समाधाने च सहायतामपि करोति। |
| क्षेत्रम् २ वृत्तिसम्बन्धीयाः सम्बन्धाः |
| विद्यार्थिनां कृते सहपाठ्यक्रमसौविध्यस्य प्रारम्भाय अन्यवृत्तिशीलैः संस्थाभिश्च मध्यस्थता करणीया। |
| २.१.१ विद्यार्थिनां विविधाध्ययनस्य सौकर्यार्थं विद्यालये सहकर्मिभिः तथान्यवृत्तिजीविकैः सम्बन्धं स्थापयति।<br>२.१.२ विद्यार्थिनां कृते वास्तवसम्मतलक्ष्यं निर्धारयति, सहायकशिक्षायाः संस्कृतिं निर्माति, तथा च तेषां सम्प्राप्तये सहायतां करोति, यत्र सर्वे सुरक्षिताः मूल्यवन्तश्चानुभवन्ति। |
| **उपक्षेत्रम् २.२ बालकानां समग्रतया विकाशाय मातृपितॄणां भूमिकायाः स्वीकरणम्, अवगमनञ्च।** |
| २.२.१. गृहे समाजे च विद्यार्थिनां यथोपयुक्ताध्ययनालम्बनस्य निश्चितकरणाय पालकैः सामाजिकैश्च सह विश्वस्थसम्बन्धं स्थापयति। |
| **उपक्षेत्रम् २.३ सम्पदादिसम्प्रदानाय स्वविद्यालयेन सह अन्यप्रतिष्ठानस्य, सम्प्रदायस्य च मिथः सम्बन्धस्थापनाय सक्षमता।** |
| २.३.१ विद्यार्थिनाम् अध्ययनस्यानुभवस्य विवर्धनाय अन्यविद्यालयस्थितैः शिक्षकैः तथा सम्प्रदायैः सह दृढं सम्बन्धं स्थापयति। |
| **उपक्षेत्रम् २.४ विद्यालयस्याभ्यन्तरे बहिर्वा नैकविशेषज्ञैः सह सम्बन्धस्थापनम्, प्रतिकूले तथा स्पर्धामूलके च परिवेशे पर्यालोचनायाः सक्षमता।** |
| २.४.१ धैर्येण विश्वासेन च सम्बन्धान् प्रबन्धयति, तथा च यथा सर्वे सांविधानिकमूल्यबोधान् मनोवृत्तीन् द्रढयन्ति तद्विषयं दृढीकरोति। |
| **उपक्षेत्रम् २.५ प्रतिष्ठानं सुदक्षतया तथा प्रभावितया च कार्याय, लक्ष्याणि तथा कौशलानि निर्धारयितुं सक्षमता तथा समेषां विद्यार्थिनां कृते समावेशिशैक्षिकलक्ष्यप्राप्तये, तथा च विद्यालयस्य सर्वेषां सदस्यानां कृते अनुकूलकार्यपरिसरस्य तथा तस्य सुस्थतायाः निश्चितकरणम् आवश्यकम्।** |
| २.५.१ विद्यार्थिनां कृते वास्तवसम्मतलक्ष्यं निर्धारयति, सहायकशिक्षायाः संस्कृतिं निर्माति, तथा च तेषां सम्प्राप्तये सहायतां करोति, यत्र सर्वे सुरक्षिताः मूल्यवन्तश्चानुभवन्ति। |

| |
|---|
| २.५.२ आत्मनः सहकर्मिणश्च कृते उत्पादनशीलकर्मसंस्कृतेः साहाय्यं करोति। |

**द्वितीयमानम् - ज्ञानम् अभ्यासश्च।**

| क्षेत्रम् ३ प्रत्येकशिशूनाम् अनन्यदक्षतायाः स्वीकृतिः, प्रत्यभिज्ञानम्, लालनञ्च। | | |
|---|---|---|
| **प्रवीणः शिक्षकः** | **उन्नतः शिक्षकः** | **कुशलः शिक्षकः** |
| **उपक्षेत्रम् ३.१. - शिशोः विकाशः तथा शिशुशिक्षा च** | | |
| **विकाशस्य भिन्नस्तरसम्बन्धिततथ्यानां भिन्नक्षेत्रसम्बन्धिततथ्यानाम् (ज्ञानात्मकं, भाषागतं सामाजिकं भावनात्मकं शारीरिकं च) अवगमनम्।** | **शिक्षणपद्धतेः चिह्नितकरणाय तथा एकैकशोविकाशाय च ज्ञानस्य प्रयोगः तथा शिशुविकाशस्यावबोधश्च करणीयः।** | **सतीर्थानां कृते शिशुविकाशतथ्यानाम् आदर्शप्रयोगः।** |
| ३.१.१ अध्ययनस्य क्षमतायै लक्ष्यसम्प्राप्तये च श्रेणिकक्षायां वैचित्र्यतायाः प्रयोजनं सम्बोधयति। | ३.१.२. विद्यार्थिनां विविधाध्ययनस्य आवश्यकतायाः अवबोधस्य उपयोगं करोति, तथा च पाठयोजनासु आदानप्रदाने च ज्ञानमिदं यथोपयुक्ततया संयोजयति। | ३.१.३. विद्यार्थिनां विविधाध्ययनस्य आवश्यकतायाः अवगमनाय सतीर्थानां साहाय्यं करोति, तथा च पाठयोजनासु आदानप्रदाने च ज्ञानमिदं यथोपयुक्ततया संयोजयति। |
| **उपक्षेत्रम् ३.२ विद्यार्थि-वैचित्र्यम्** | | |
| **भिन्नप्रकारस्य विद्यार्थिवैचित्र्यस्य (शिक्षणशैल्याः, शिक्षणस्यावश्यकतायाः, आर्थ-सामाजिक-स्थितेः, संस्कृतेः, भाषायाः, पारिवारिकस्थितेश्च तथा तेषां विद्यालयेषु कक्षासु च प्रयोगः करणीयः।** | **विद्यार्थिनां विविधप्रयोजनस्य पूर्त्ये, तथा व्यापककक्षायाः निर्माणाय शिक्षणसम्पदः ज्ञानस्य अनुप्रयोगः।** | **कक्षायाः अनुभवानुसारं प्रत्येकशःछात्राणां विविधानाम् आवश्यकतानां निदानं सम्बोधनं च कर्तुं सक्षमता।** |
| ३.२.१. विद्यार्थिनां सामाजिकं सांस्कृतिकं लिङ्गगतं धर्मगतञ्च पृष्ठभूमिम् अविचार्य्य सर्वान् एव | ३.२.२. विविधसम्पदं प्रस्तावयति, तथा च विषयगतस्वचिन्तनस्य अभिमतस्य च अभिव्यक्तये | ३.२.३. व्यक्तिगतशिक्षणावश्यकतायाः निदानं ददाति, तथा च युगपत्तया प्रशिक्षणाध्ययनस्य |

| | | |
|---|---|---|
| विद्यार्थिनः समभावेन तथा विद्यालये तथा श्रेणिकक्षायां कार्यक्रमे भागग्रहणाय प्रोत्साहयितुं गणयति। | उत्साहं प्रददाति। | कौशलानि आयत्तीकरोति। |
| **उपक्षेत्रम् ३.३ - प्रतिबन्धिविद्यार्थिनां तथा मेधाविविद्यार्थिनाम् अध्ययनस्य प्रयोजनम्।** | | |
| **भिन्नप्रकारस्य अक्षमता, तस्याश्च विशेषरूपेण शिक्षणस्य प्रयोजनीयता, अपि च प्रतिभावतां शिशूनां शिक्षणस्य प्रयोजनीयतायाः समर्थनं तथा शिक्षणस्य कृते नूतनकौशलस्याविष्करणम्।** | **कक्षायां विभिन्नानां विद्यार्थिनां प्रयोजनस्य सम्बोधनाय चिह्नितकरणाय च विशिष्टप्रयोजनीयज्ञानस्य अनुप्रयोगः।** | **विशिष्टप्रयोजनस्य चिह्नितकरणसक्षमता, या विशेषज्ञानां सहयोगिताम् अपेक्षते, तथा च कस्यामपि परिस्थितौ कथमभिगमनं करणीयं तद्विषये सतीर्थेभ्यः तथ्यं प्रदानीयम्।** |
| ३.३.१. प्रतिबन्धिविद्यार्थिनां तथा मेधाविविद्यार्थिनां कृते व्यवहारयोग्यतया सम्यक्तया संरक्षितरूपेण च उत्तमश्रेणिकक्षापर्यावरणस्य तथा च सम्पदां समायोजनं करोति।<br>३.३.२. श्रेणिकक्षायाः कार्येषु यथा पठन-गणित-सम्बद्धेषु बाधाप्राप्तविद्यार्थिनां प्रति धैर्यवता तथा विचारशीलेन च भवितव्यम्। | ३.३.३. व्यक्तिगत-विद्यार्थि-प्रयोजनानुसारं विविधोपयुक्तसम्पदः तथा निर्देशात्मककौशलस्य व्यवहारं ज्ञापयति।<br>३.३.४. विद्यार्थिषु अध्ययनेच्छां वर्धनाय विद्यार्थिनां सामर्थ्यानुसारं कौशलेन विद्यार्थिसंगोष्ठीं समायोजयति। | ३.३.५. विशेषप्रयोजनानुसारं शिशूनां कृते व्यक्तिगत-शिक्षा-परिकल्पनां निर्माति।<br>३.३.६. प्रतिबन्धिविद्यार्थिनां तथा मेधाविविद्यार्थिनां च प्रयोजनानुसारं श्रेणिकक्षायाः अधिकाधिकतया आकर्षणत्वस्य वर्धनाय शिक्षाशास्त्रीयकौशलस्य उपदेशं प्रददाति सतीर्थेभ्यः। |

| क्षेत्रम् - ४ - विषयस्य ज्ञानम्, धारणागतावगमनं तथा प्रयोगश्च | | |
|---|---|---|
| **प्रवीणः शिक्षकः** | **उत्तमः शिक्षकः** | **कुशलः शिक्षकः** |
| **उपक्षेत्रम् ४.१ - विषयस्य ज्ञानम्, धारणागतावगमनं तथा प्रयोगश्च** | | |
| **विषयं प्रति गभीरज्ञानस्य, अवबोधस्य, प्रयोगस्य च दक्षताप्रदर्शनम्।** | **आन्तस्तथान्तर्विषयाणां विषयवस्तुनः संयोगः प्रयोज्यः तथा च स्थानीयज्ञानस्य देशीयज्ञानस्य चैक्यं साधनीयम्।** | **विषयस्योन्नत्या साकम् अद्यतनता स्थापनीया, तथा च पाठ्यक्रमनिर्वाहे नूतनधारणायाः समागमनं करणीयम्।** |
| ४.१.१ धारणायाः प्रशिक्षणार्थं विविधकौशल्यस्य यथा कार्यक्रमाणां, कथानां, परीक्षणानां च व्यवहारं करोति।<br>४.१.२. यथोपयुक्ततया विद्यार्थिभिरुत्थितप्रश्नानां विस्तृततया उत्तरं प्रददाति। | ४.१.३. साम्प्रतिक-पुरातन-धारणयोर्मध्ये मिथः सम्बन्धं करोति।<br>४.१.४. यत्र प्रयोजनमनुभवति तत्र विद्यालयस्य विषयान्तरेण सह स्थानीयज्ञानस्य सम्बन्धं स्थापयति। | ४.१.५. विषयगतपाठ्यक्रमिकप्रत्याशापूरणाय शिक्षाशास्त्रीयप्रयुक्तिं संयोजयति।<br>४.१.६. स्वविषयसम्बद्धं तथान्यविषयसम्बद्धं गवेषणाप्रबन्धान्, प्रबन्धपत्राणि, नानाविषयसम्बद्धानि पुस्तकानि नियतं प्रवर्तयन्ति। |

| क्षेत्रम् ५ पाठ्यक्रमः | | |
|---|---|---|
| **प्रवीणः शिक्षकः** | **उत्तमः शिक्षकः** | **कुशलः शिक्षकः** |
| **उपक्षेत्रम् ५.१ पाठ्यक्रम-रूपरेखा** | | |
| **विषयगतपाठ्यक्रमस्य पाठ्यक्रमरूपरेखायाश्च लक्ष्याणां सुस्पष्टबोधस्य विकाशः।** | **आन्तस्तथान्तर्विषयाणां पाठ्यक्रमगतसंयोगस्य अवबोधाय तथा विकाशाय सहकर्मिभिः सह सहकार्यं करणीयम्।** | **नवीनतमविकाशान् तथा नूतनज्ञानं विचार्य्य पाठ्यक्रमनिर्वाहस्य परिवर्तनम् अभ्युन्नतिश्च विधेया।** |

| | | |
|---|---|---|
| ५.१.१. पाठ्यक्रमिकप्रत्याशा तथा विषयप्रशिक्षणस्य लक्ष्याणि मनसि निधाय पाठ्यं निर्वहति। | ५.१.२. शिक्षार्थिषु सामग्रिकतया शिक्षां सक्षमाय विषयगतपाठ्यक्रमस्य तथा अन्यविषयस्य मध्ये मिथः सुस्पष्टं सम्बन्धं निर्माय पाठ्यं निर्वहति। | ५.१.३. परिकल्पनाय कार्यनिवाहाय च विषयगतनूतनधारणाः संयोजयति।<br>५.१.४. परिकल्पनाय कार्यनिवाहाय च कर्मशालातः, अध्ययनात् तथा अन्यस्रोतसः च प्राप्तज्ञानस्य प्रयोगं करोति। |
| **क्षेत्रम् ६ विद्यार्थिनामध्ययनाय सूचिपत्रगतविषयस्य अभ्युन्नतिः** | | |
| **प्रवीणः शिक्षकः** | **उत्तमः शिक्षकः** | **कुशलः शिक्षकः** |
| **उपक्षेत्रम् ६.१ निर्देशात्मकाः / शिक्षाशास्त्रीय-नीतयः शिक्षणवर्गीकरणानि च।** | | |
| **सामान्यनिर्देशात्मकनीतीनाम्, शिक्षणवर्गीकरणानां शिक्षाक्षेत्रे नियुक्तिं, सामान्यशिक्षाशास्त्रीयपद्धतिं सम्पदञ्चावगमनम्।** | **स्वविषये स्वशिक्षाक्षेत्रे वा शिक्षणस्य वर्गीकरणेन शिक्षागतकौशलस्य प्रणयनमाध्यमेन च उन्नतरूपेणोपयुक्तशिक्षणलक्ष्यस्य शिक्षणपरिणामस्य वा विकाशः करणीयः।** | **आकर्षकानुशीलस्य परिकल्पनायाः निर्माणाय शिक्षणतथ्यस्य चयने, निर्देशात्मककौशलग्रहणे शिक्षाशास्त्रीयकौशलग्रहणे वा शिक्षणवर्गीकरणे सहकारिणः सहयोगिता करणीया।** |
| ६.१.१. विषयस्य सम्यक् अवबोधनाय विद्यार्थिषु मुक्ततया संलापस्य सौकर्यं प्रददाति। | ६.१.२. विविधविषयेषु प्रश्नं प्रष्टुम्, आलोचयितुं वितर्के स्वचिन्तनं उपस्थापयितुं प्रोत्साहयति विद्यार्थिनः। | ६.१.३. सतीर्थशिक्षणस्य सौकर्यार्थं बहुसंरचितानाम् असंरचितानां सम्बन्धस्य व्यवहारे भारसाम्यस्य निश्चितकरणे मार्गदर्शकाः सतीर्थरूपेणाचरन्ति। |
| **उपक्षेत्रम् ६.२ विविधनिर्देशः/ विविधशिक्षणम्** | | |
| **भिन्ननिर्देशिकायाः/ भिन्नशिक्षणकौशलस्य, तथा च शिक्षणे शिक्षार्थिनां भागग्रहणप्रवृत्तिवृद्धये तेषां भूमिकाविषये सुस्पष्टावगमनं** | **शिक्षायां शिक्षार्थिनां व्यापृतकरणाय भिन्ननिर्देशिकायाः अनुप्रयोगः।** | **विद्यार्थिनाम् अभ्युपगमवर्धनाय उन्नतोपयुक्तभिन्नकार्यक्रमस्य कौशलस्य च निर्माणे सहकारिणः सहयोगिता करणीया।** |

| | | |
|---|---|---|
| **बोधप्रदर्शनं च करणीयम्।** | | |
| ६.२.१. पाठ्यक्रमस्य उद्देश्यं विज्ञापयितुं शिक्षणाध्यायनपद्धतेः तथा कौशलस्य साहित्यं व्यवहरति। | ६.२.३. विद्यार्थिनो यथा यथार्थतया आह्वायकाः स्युः, तदर्थं विविधाध्ययनप्रयोजनवन्तीषु गोष्ठीषु अध्ययनाय प्रश्नस्य कार्यस्य वा विविधतां सम्पादयति। | ६.२.५. विद्यार्थिनां कृते स्वकीयचिन्तनस्य अभिव्यक्तये पर्याप्तस्थानयुक्तस्य विविधतासम्पन्नस्य निर्देशकौशलस्य नियमितरूपेण व्यवहारं करोति। |
| ६.२.२. सर्वेभ्यः शिक्षार्थिभ्यः विचारयुक्तां समर्थितां च प्रतिक्रियां प्रददाति। | ६.२.४. विद्यार्थिनो यथा यथार्थतया आह्वायकाः स्युः, तदर्थं विविधाध्ययनप्रयोजनवन्तीषु गोष्ठीषु अध्ययनाय प्रश्नस्य कार्यस्य वा विविधतां सम्पादयति। | ६.२.६. विद्यार्थिनां कृते स्वकीयचिन्तनस्य अभिव्यक्तये पर्याप्तस्थानयुक्तस्य विविधतासम्पन्नस्य निर्देशकौशलस्य नियमितरूपेण व्यवहारं करोति। |
| **उपक्षेत्रम् ६.३ सूक्ष्मचिन्तनं, सर्जनात्मकचिन्तनं तथा च उच्चनिर्देशात्मकचिन्तनकौशलसदृशजीवनकौशलस्य विकाशाय नीतयः उपकरणानि च।** | | |
| **सामान्यशिक्षागतकौशलानां प्रति गभीरोपलब्धिप्रदर्शनं, यत् समालोचनात्मकस्य सर्जनशीलचिन्तायाः तथा अन्योच्चतरचिन्तायाश्च दक्षतां विकाशते ।** | **विशिष्टकौशलस्योन्नतये उपयुक्तशिक्षाशास्त्रीयकौशलस्य व्यवहारः।** | **शिक्षाक्षेत्रे साम्प्रतिककालिकोन्नतशिक्षाव्यवस्थानुसारं शिक्षाशास्त्रीयकौशलानां निर्माणं करणीयम्।** |
| ६.३.१. श्रेणिकक्षागतकार्यक्रमं व्यवहरति, यत् प्रात्यहिकजीवनस्य समस्यायां चिन्तनस्य प्रयोगे शिशोः सहायतां करोति।<br>६.३.२. कानिचन श्रेणिकक्षागतकार्याणि संयोजयन्ति (यथा - ध्यानं, वृत्तसमयः चेत्यादीनि) यानि सामाजिक-भावनात्मक-प्रयोजनं | ६.३.३. श्रेणिकक्षायाः निर्देशिकांशतया विश्लेषणाय अनुसन्धानाय च शिशुभ्यः प्रतिनियतं परिसरं प्रयच्छति।<br>६.३.४. सामाजिक-परिचर्चा, सम्बन्धस्थापनं, प्रात्यहिक-श्रेणिकक्षा-कार्यक्रमस्य सहयोगिता चेत्यादेः सामाजिक-भावात्मक-कौशलस्य अभ्युन्नतिं | ६.३.५. विशिष्टविषयाणां कृते विषयेषु वा समीक्षात्मकचिन्तनस्य, अन्वेषणस्य प्रश्नस्य प्रतिक्रियायाः इत्यादीनां सौकर्यार्थं शिक्षाशास्त्रीयदृष्टिकोणान् समुत्पादयति।<br>६.३.६. नियमितरूपेण व्यक्तिगतविद्यार्थिनां सामाजिक-भावनात्मक-प्रयोजनानां परीक्षणं |

| | | |
|---|---|---|
| पूरयन्ति। | सक्रियतया संयोजयति। | तथा सम्बोधनं करोति। |
| **क्षेत्रम् ७ अध्ययनपरिकल्पनाः** | | |
| **प्रवीणः शिक्षकः** | **उत्तमः शिक्षकः** | **कुशलः शिक्षकः** |
| उपक्षेत्रम् ७.१ अध्ययनस्य लक्ष्यमुद्देश्यञ्च | | |
| **परिमापयोग्यस्य आहरणयोग्यस्य च शिक्षणलक्ष्यस्य उद्देश्यस्य चावगमनम्।** | **पाठ्यक्रमरूपरेखया सह संगतिपूर्णविषयस्य कृते परिमापयोग्यस्य आहरणयोग्यस्य च शिक्षणलक्ष्यं शिक्षणोद्देश्यं च निर्माणीयम्।** | **लभ्ययोग्यलक्ष्याणि, विद्यार्थिनां भिन्नप्रयोजनीयतापूर्तीन्, तथा च समग्रविकाशं विचार्य्य उच्चापेक्षाणां तथा उन्नताह्वानानां सज्जीकरणसक्षमता।** |
| ७.१.१. संस्थानस्योद्देश्यानि मनसि निधाय अनुशीलनस्य परिकल्पनां निर्माति, तथा च अध्ययनफललाभाय यथार्थतया विवरणकार्याणि तथा मूल्याङ्कनानि साधयति। | ७.१.२. विषयस्य लक्ष्यमुद्देश्यञ्च प्राप्तये अध्ययनफलस्य निबन्धनं करोति। | ७.१.३. यदावश्यकमनुभवति तदा विशिष्टाध्ययनपरिणामानां सम्बोधनकाले स्थानीयसन्दर्भस्य प्रयोजनानां च अनुरूपं पाठ्यानुरूपम् अनुशीलनं कौशलानि च सन्दर्भयति। |
| **उपक्षेत्रम् ७.२ अध्ययनानुभवस्य परिकल्पना** | | |
| **विशिष्टशिक्षणोद्देश्यस्य कृते शिक्षणपरिकल्पनाविकाशे सक्षमता।** | **एकैकशःशिक्षार्थिनां प्रयोजनानि एकत्रीकृत्य भिन्नप्रकारकशिक्षणयोजनानां निर्माणम्।** | **पाठ्यक्रममाधारीकृत्य आन्तःसम्बन्धीयशिक्षणपरिकल्पनायाः निर्माणसक्षमता।** |
| ७.२.१ विषयैः, परिणामैः, क्रियाकलापैः, मूल्याङ्कनकौशलविवरणैः च सह विस्तृतपाठ्यपरिकल्पनां विकाशयति। | ७.२.२ अधिकाधिकतया समर्थनयोग्यप्रयोजनवतां विद्यार्थिनां निर्दिष्टकार्यकलापस्य तथा सम्पदां परिकल्पनां करोति। | ७.२.३ क्रमानुसारं विन्यस्तधारणाः, अध्यायमाश्रित्य कथं शिशवः विषयं जानन्ति, तथा च पूर्ववर्गेषु तेषां शिक्षणं कथं जातं चेत्यादिकमाश्रित्य पाठ्यपरिकल्पनां निर्माति। |

| क्षेत्रम् ८ शिक्षणस्य शिक्षकरूपेण च मूल्याङ्कनम्। | | |
|---|---|---|
| **प्रवीणः शिक्षकः** | **उत्तमः शिक्षकः** | **कुशलः शिक्षकः** |
| **उपक्षेत्रम् ८.१ मूल्याङ्कन-कौशलानि।** | | |
| **भिन्नप्रकारकमूल्याङ्कनकौशलानाम् उपकरणानां चावगमनम्।** | **विद्यार्थिशिक्षायाः प्रयोजनानुसारं यथोपयुक्तमूल्याङ्कनकौशलस्य चयनम्।** | **संस्थानात्मके, राज्ये, राष्ट्रियस्तरे च मूल्याङ्कननीतीनां ज्ञानस्य प्रदर्शनम्।** |
| ८.१.१. विद्यार्थिनां मूल्याङ्कनाय कक्षायाः अवलोकनं, प्रश्नोत्तरं, पुस्तिकायां लिखितकार्यं चेत्यादीनां कौशलानि व्यवहरति।<br>८.१.२. शिक्षणाध्ययनप्रक्रियासु विद्यार्थिनां समक्षं मुक्ततया प्रश्नान् उपस्थापयति। | ८.१.३. विद्यार्थिनाम् अध्ययनस्य प्रयोजनानुसारं नियमितरूपेण विविधपद्धतेः यथा परियोजनायाः उपस्थापनायाः पत्रराशेः, परीक्षणस्य, प्रतियोगितायाः, निरीक्षणस्य, अवस्थाध्ययनस्य व्यवहारं करोति।<br>८.१.४. प्रदत्तविषयसम्बन्धे विद्यार्थिनः किं जानन्ति किञ्च अवबुध्यन्ते तद्विषये विद्यार्थिभिः सह संलापम् आरभ्यते। | ८.१.५. मूल्याङ्कनीयोत्कृष्टाभ्यासस्य कार्यान्वयनं करोति यथा प्रस्तावितम् अस्मिन् नीतिलेखपत्रेषु।<br>८.१.६. अध्ययनाय तथा श्रेणिकक्षायाम् अध्ययनाय मूल्याङ्कनं सक्रियतया संयोजयति। |
| **उपक्षेत्रम् ८.२ मूल्याङ्कन-तथ्यम्।** | | |
| **मूल्याङ्कनतथ्यात् छात्राणाम् अन्तर्निहितप्रतिभायाः ज्ञानम्।** | **लक्ष्यस्थिरीकरणाय शिक्षणपरियोजनानिर्माणाय च मूल्याङ्कनतथ्यस्य व्यवहारः।** | **विद्यार्थिनां/ श्रेणिकक्षायाः अग्रगतेः एकीभूतदृष्टिनिर्माणाय, तथा च यथोपयुक्त-प्रतिकारमाध्यमेन शिक्षायाः समर्थनाय अन्यस्मात् स्रोतसः तथ्यसमूहस्य व्यवहारः।** |
| ८.२.१. श्रेणिकक्षाशिक्षायां सामान्यसमस्याः तथा च विकल्पधारणासमूहान् चिह्नितकरणाय तथा च विज्ञापितुं मूल्याङ्कनतथ्यं | ८.२.२. विद्यार्थिनां कृते निर्दिष्टाध्ययनस्य प्रयोजनानुरूपां पाठ्यपरिकल्पनां तथा शिक्षाशास्त्रीयविषयं पर्याप्ततया संशोधयितुं मूल्याङ्कनस्य तथ्यं | ८.२.३. निर्देशिकायाः परिकल्पनायाश्च अभ्युन्नतेः क्षेत्राणि चिह्नितकरणाय नैकानि मूल्याङ्कनानि व्यवहृत्य संगृहीतशिक्षार्थिनां शिक्षायाः |

| | | |
|---|---|---|
| व्यवहरति। | व्यवहरति। | तथ्यं संश्लेषितं करोति।<br>८.२.४. निर्देशिकायाः परिकल्पनायाश्च अभ्युन्नतेः क्षेत्राणां चिह्नितकरणं करोति तथा निर्दिष्टनियुक्तेः परिकल्पनां करोति। |
| **उपक्षेत्रम् ८.३ सम्पर्कः प्रतिक्रिया च।** | | |
| **छात्रैः छात्रपालकैश्च सह छात्राणाम् अग्रगतिविषये पर्यालोचना करणीया।** | **विद्यार्थिनाम् अग्रगतेः निर्दिष्टप्रतिक्रिया तदीयपालकैः परिपालकैश्च सह पर्यालोचनीया।** | **छात्रशिक्षणार्थम् अनुशासनविषये पालकानां समुदायसदस्यानां च सहयोगिता करणीया।** |
| ८.३.१. विद्यार्थिभ्यः प्रदत्तकार्यस्य परीक्षणकाले तथा तेषां प्रदत्तोत्तरस्य प्रतिक्रियाप्रदानकाले निर्दिष्टतया गुणगतप्रतिक्रियां प्रददाति।<br>८.३.२. विद्यालयेन आयोजिते पालक-शिक्षक-संगोष्ठ्याः आलोचनासत्रे विद्यार्थिनां परीक्षायाः परिणामं तथा श्रेणिकक्षायां भागग्रहणं च समाश्रित्य तेषाम् अग्रगतिविषये छात्रपालकैः परिपालकैश्च सह पर्यालोचनां करोति। | ८.३.३. नियमिततया निर्दिष्टसूचनानुसारं प्रत्येकं व्यक्तिगततया विद्यार्थिनः विस्तृतप्रतिक्रियां प्रददाति विद्यार्थिनाम् कर्मक्षमतायाः समुन्नत्यर्थम्।<br>८.३.४. विद्यार्थिनाम् अग्रगतेः निर्दिष्टप्रतिक्रियां तदीयपालकेभ्यः परिपालकेभ्यश्च प्रददाति। | ८.३.५. स्वस्य सतीर्थस्य च मूल्याङ्कनसक्षमतामाध्यमेन तेषां कर्मक्षमतायाः प्रतिफलनं कर्तुं सक्रियतया विद्यार्थिनः प्रोत्साहयति।<br>८.३.६. गृहे कथं शिशूनाम् अध्ययनाय अनुशासनं स्यात्, तद्विषये निर्दिष्टतया तथा सुविचार्य्य उपदेशं प्रददाति पालकेभ्यः/परिपालकेभ्यः। |
| **क्षेत्रम् ९ शिक्षायां प्रयुक्तेः व्यवहारः अन्तर्भुक्तिकरणञ्च।** | | |
| **प्रवीणः शिक्षकः** | **उत्तमः शिक्षकः** | **कुशलः शिक्षकः** |
| **शिक्षाक्षेत्रे प्रयुक्तेः/तन्त्रज्ञानस्य भूमिकावबोधः।** | **शिक्षणशिक्षायाः, मूल्याङ्कनस्य, श्रेणिकक्षपरियोजनायाः च समर्थनाय सूचनायास्तथा संचारस्य प्रौद्योगिक्युपकरणस्य व्यवहारं करोति।** | **आत्मनस्तथा सहकारिणः शिक्षणशिक्षायाः समर्थनाय यथोपयुक्तप्रयुक्तिगतसम्पदः निर्माणं करणीयम्।** |

| | | |
|---|---|---|
| ९.१. उपयुक्तप्रौद्योगिकसम्पदः चिह्नितं करोति, याः शिक्षणस्य निर्दिष्टधारणायाः परिणामगततया अभ्युन्नतिं साधयन्ति। | ९.२. कार्यकारिरूपेण विद्यमानप्रौद्योगिकसम्पदः सर्जनात्मकशिक्षणानुशीलनेन साकं मूल्याङ्कनानुशीलनस्य परिवर्तनं कर्तुम् अभियोजयति। | ९.३. आत्मनस्तथा सहकारिणः शिक्षणशिक्षायाः समर्थनाय यथोपयुक्तप्रौद्योगिकगतसम्पदं निर्माति।. |
| **क्षेत्रम् १० श्रेणिकक्षायाः उपादानं गतिशीलता च।** | | |
| **प्रवीणः शिक्षकः** | **उत्तमः शिक्षकः** | **कुशलः शिक्षकः** |
| **उपक्षेत्रम् १०.१ सुरक्षितः, परिपोषकः, सहायकश्च शिक्षणपरिसरः।** | | |
| **सुरक्षितं परिव्यापकं च श्रेणिकक्षां निर्मातुं सौविध्यानां संसाधनानाञ्च आयोजनं करणीयम्।** | **फलप्रदायकः तथा समर्थनयोग्यशिक्षणपरिसरः सज्जीकरणीयः, यत्र आशावर्धकाः छात्राः निर्भयतया स्वमतं प्रकटयिष्यन्ति।** | **सुरक्षितश्रेणिकक्षायाः परिव्यापकश्रेणिकक्षायाः च विकाशे छात्राणां नियुक्तिः।** |
| १०.१.१ श्रेणिकक्षायाः कार्यानुष्ठानार्थं दिनचर्यायाः प्रक्रियायाश्च निबन्धं करोति। | १०.१.३. विद्यार्थिनां सहमतानुसारं विचार्य्य नमनीयश्रेणिकक्षादिनचर्यां निबन्धाति। | १०.१.५. विद्यार्थिसकाशात् स्वामित्वं गृहीत्वा श्रेणिकक्षायाः दिनचर्यायाः सह-विकाशं साधयति। |
| १०.१.२. श्रेणिकक्षायाम् उद्वेगमुक्तपर्यावरणस्य निश्चितं करोति, यत् विद्यार्थिषु गतिं, संलापं तथा सम्पर्कस्थापनं च प्रोत्साहयति। | १०.१.४. विद्यार्थिनः मुक्ततया स्वमतोपस्थापयितुं, प्रासङ्गिकदिनप्रतिदिनविषयेषु (उत्तेजकपूर्णानुभवाः, उत्पीडनस्य समस्याः, विश्वासस्थापना चेद्यादयः) चर्चां कर्तुं च प्रोत्साहयति। | १०.१.६. श्रेणिकक्षायाः कृते नियमानां सह-सर्जनं करोति, ये सुरक्षित-परिव्यापक-अनुकूलकक्षायाश्च भावनां प्रतिविम्बयन्ति। |
| **उपक्षेत्रम् १०.२ श्रेणिकक्षायाः परियोजना।** | | |
| **श्रेणिकक्षापरियोजनापद्धतीनां ज्ञानं तथा तेषाम् उपयोगक्षमतायाश्च प्रदर्शनम्।** | **विद्यार्थिनाम् आचरणस्य वैचित्र्यम् अवबोधनीयं, तथा च संयोजनीयम्।** | **विद्यार्थिषु आत्मानुशासनस्य, व्यक्तिगतदायित्वस्य, नेतृत्वस्य च विकाशः साधनीयः।** |

| | | |
|---|---|---|
| १०.२.१. श्रेणिकक्षायां स्वस्य विधिं नियमञ्च निबन्धाति, तथा प्रासङ्गिकविषये विद्यार्थिनः आचरणस्य परीक्षां तथा च संशोधनं करोति। | १०.२.२. यथोपयुक्ततया विद्यार्थिनाम् आचरणेन साकं पाठ्यविषयस्य तथा प्रतिक्रियायाः सम्बन्धं स्थापयति। | १०.२.३. लोकतान्त्रिकतया विद्यार्थिभिः प्रत्याशानां सहविकशं साधयति, तथा च तेभ्यः एव प्रत्याशानां यथोपयुक्तकरणाय प्रोत्साहयति। |
| **उपक्षेत्रम् १०.३ फलप्रदायक-श्रेणिकक्षा-सम्भाषणम्।** | | |
| **भिन्न-वाचनिक-अवाचनिक-श्रेणिकक्षा-सम्भाषण-कौशलस्य अवबोधे दक्षतायाः आहरणम्।** | **शिक्षणं भागग्रहणमूलकं कर्तुं भिन्न-वाचनिक-अवाचनिक-श्रेणिकक्ष-सम्भाषण-कौशलस्य व्यवहारः प्रतिवचनञ्च करणीयम्।** | **सहकारिभ्यः श्रेणिकक्षासम्भाषणस्य उन्नतौ समर्थनाय तथा मार्गदर्शनाय निर्माणमूलकप्रतिक्रियायाः प्रदानम् आवश्यकम्।** |
| १०.३.१ यथोपयुक्तवाचनिक-अवाचनिकसंलापकौशलस्य यथा नेत्रसम्पर्कं, इङ्गितादिकं, प्रेरणा चेत्यादेः प्रदर्शनं करोति। | १०.३.२ विविधप्रतिस्पर्धायां भागग्रहणाय विद्यार्थिनं प्रोत्साहयितुं विविधोपयुक्तवाचनिकसंलापकौशलस्य तथा अवाचनिकसंलापकौशलस्य च व्यवहारं करोति।<br>१०.३.३. व्यक्तिगतविद्यार्थिनाम् अमौखिकसंलापस्य विश्लेषणं करोति, तथा अध्यापनकाले स्वस्य संलापकौशलस्य च यथार्थतया समायोजनं करोति। | १०.३.४. फलप्रदायक-श्रेणिकक्षासम्भाषण-कौशलानां कार्यान्वयने सतीर्थान् मार्गं दर्शयन्ति मार्गदर्शकाः। |
| **उपक्षेत्रम् १०.४ भाषावैचित्र्यम् बहुभाषिकता च।** | | |
| **भाषावैचित्र्यं तथा प्रासङ्गिकभाषासु दक्षताम् अनपेक्ष्य समेषां शिशूनां प्रति समभावं प्रदर्शनीयम्।** | **शिक्षणस्य विद्यायाश्च सौविध्यर्थं श्रेणिकक्षायां बहुभाषिकतायाः नियुक्तौ सहकारिणः समर्थनं करणीयम्।** | **सतीर्थेषु शिक्षणस्य शिक्षायाश्च सौकर्यार्थं बहुभाषिकतायाः व्यवहारे प्रातिनिध्यं करणीयम्।** |

| | | |
|---|---|---|
| १०.४.१. श्रेणिकक्षायां प्रयोजनानुसारं निर्देशिकामाध्यम-स्थानीयभाषयोर्मध्ये परिवर्तनं संसाधयति। | १०.४.२. भाषागतवैचित्र्यमूलकश्रेणिकक्षायां कौशलस्य आयत्तीकरणे मार्गदर्शकाः सतीर्थरूपेणाचरन्ति। | १०.४.३. श्रेणिकक्षायाम् उत्कृष्टशिक्षणाय अनुशीलनेन, प्रबन्धरचनया, सतीर्थगोष्ठमध्ये आलोचनामाध्यमेन च बहुभाषिकशिक्षाशास्त्रीयस्य प्रयोजनीयतां प्रदर्शयति। |


## तृतीयमानम् - वृत्तिसम्बन्धीययवृद्धिः अभ्युन्नतिश्च

| क्षेत्रम् ११ अध्ययनस्यावश्यकता | | |
|---|---|---|
| **प्रवीणः शिक्षकः** | **उत्तमः शिक्षकः** | **कुशलः शिक्षकः** |
| **अध्ययनप्रयोजनस्य चिह्नितकरणं, तथा आत्मनो वृत्तियोग्यतायाः विकाशे लक्ष्यस्थापनम्।** | **विशेषज्ञसकाशात् प्राप्ततथ्यानुसारम् एका वृत्तिसम्बन्धीयोन्नतपरिकल्पना निर्माणीया।** | **परिकल्पना तथा च सहकारिभ्यः वृत्तिसम्बन्धीयोन्नतावसरस्य प्रदानम्** |
| ११.१. अभ्युन्नतेर्विस्तृतक्षेत्रं सम्बोधयितुं परिकल्पनाम् अभिजानाति ।<br>११.२. निर्दिष्टतया शिक्षणावश्यकतायाः कृते कर्मशालायाः सभायाः प्रशिक्षणस्य चर्चासत्रस्य सम्मेलनस्य च अन्वेषणं करोति। | ११.३. उन्नयनक्षेत्रं सम्बोधयितुं कार्यानुसन्धानस्य अन्यप्रतिरक्षामूलकस्य वा व्यवस्थां गृह्णाति।<br>११.४. प्रबन्धं, पुस्तकाध्यायं, पुस्तकं, समकक्षपर्यालोचनां च रचनायाम् अवदानं विद्यते। | ११.५. अध्ययनावश्यकताम् अभिज्ञातुं तथा प्रयोजनानां पूरणाय उपयुक्तव्यवस्थां परिकल्पयितुं मार्गदर्शकाः सहकर्मिरूपेणाचरन्ति।<br>११.६. पत्रिकादिषु प्रबन्धरचनायां तथा कार्यानुसन्धाने मार्गदर्शकाः सहकर्मिरूपेणाचरन्ति। |

| क्षेत्रम् १२ प्रतिफलितानुशीलनम् | | |
|---|---|---|
| **प्रवीणः शिक्षकः** | **उत्तमः शिक्षकः** | **कुशलः शिक्षकः** |
| **प्रतिफलितानुशीलनात्मकावबोधस्य प्रदर्शनम्** | **आत्मनः शिक्षणाभ्यासस्य अभिसंनमनाय प्रतिफलितानुशीलनस्य व्यवहारः** | **प्रतिफलितानुशीलनस्य प्रयोगे सहकारिणं समर्थनं/ मार्गदर्शनं वा करणीयम्।** |

| | | |
|---|---|---|
| १२.१. स्वाभ्यासस्य सामर्थ्यं दुर्बलताञ्च आलोचयति।<br>१२.२. व्यक्तिगतविद्यार्थिनां सामर्थ्यं दुर्बलताञ्च आलोचयति। | १२.३. विद्यार्थिनाम् अध्ययनस्य प्रयोजनानुसारं पाठ्यपरिकल्पनायाः तथा श्रेणिकक्षायाः कौशलानां च प्रतिफलितपत्राणि।<br>१२.४. श्रेणिकक्षासु उत्कृष्टतया शिक्षण-प्रशिक्षणस्य कृते अनुशीलनान्तरस्य अभ्यासाय नैके पन्थानः अवलम्बनीयाः। | १२.५. प्रतिफलिताभ्यासे सहकर्मिणः मार्गं दर्शयति।<br>१२.६. प्रचलिताध्ययनाय सतीर्थसमर्थनगोष्ठ्याः निर्माणाय पदक्षेपः ग्रहणीयः \| |
| **क्षेत्रम् १३ अध्ययनसम्प्रदाये नियुक्तिः भागग्रहणञ्च** | | |
| **प्रवीणः शिक्षकः** | **उत्तमः शिक्षकः** | **कुशलः शिक्षकः** |
| **विद्यालयाभ्यन्तरे बहिस्थे च अध्ययनावसरे भागग्रहणम्।** | **सम्मेलने, चर्चासत्रे, आन्तर्जालिकचर्चासत्रे च तेषाम् अनुसन्धानम् अध्ययनञ्च उपस्थापयति।** | **विद्यालयमध्ये अध्ययनसम्प्रदायस्य नियुक्तिः तथा वृत्तिसम्बन्धीयोन्नतेः सत्रस्यायोजनम् करणीयम्।** |
| १३.१. विद्यालयमध्ये बहिस्थे वा सहोपभुक्त-शिक्षणसौविध्यानां कृते विविधस्थले विविधस्रोतसः अंशग्रहणस्य व्यवहारं करोति।<br>१३.२. प्रासङ्गिकानुष्ठाने योगदानं करोति, यत् अधिकाधिकतया भागग्रहणकारिणः पर्यवेक्षकस्य वा योग्यतायां वृत्तिसम्बन्धीयशिक्षायाः तथा अनुसन्धानस्य प्रचारं करोति। | १३.३. नियमितरूपेण एव स्वाध्यायस्य, श्रेणिकक्षायाः परीक्षणस्य चेत्यादीनाम् उपस्थापनं करोति जातीयस्तरीयसम्मेलने/ चर्चासत्रे ।<br>१३.४. नियमितरूपेण एव स्वाध्यायस्य, श्रेणिकक्षायाः परीक्षणस्य चेत्यादीनाम् उपस्थापनं करोति जातीयस्तरीयसम्मेलने/ चर्चासत्रे । | १३.५. सहकर्मिणां ज्ञानवृद्धये कर्मशालायाः आलोचनासभायाः प्रशिक्षणस्य चर्चासत्रस्य सम्मेलनस्य च समायोजनं करोति।<br>१३.६.0.<br>प्रतिवेशिविद्यालयतः शिक्षकाणाम् एकस्य वर्धितशिक्षासम्प्रदायस्य अभ्युन्नतये कार्यं करोति । |

# ७. राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानविषये राष्ट्रिय-शिक्षक-योग्यता-संस्थानस्य कृते अङ्कीय-आधारभूतसंरचनायाः परिकल्पना।



## राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-माने कार्यावसरस्य सूचकघटकाः

**राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य द्वारोत्पादनम् (Digital Portal)**

शिक्षक-निधानम्, शिक्षा-निधानम्, प्रत्ययि-संप्रणयनम्, राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य कृते मूल्याङ्कनम् (स्वस्य मार्गदर्शकस्य च), कार्यान्वयनाय राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य अङ्कीयव्यवस्था, संस्था कार्यक्रमप्रबन्धश्च, दीक्षया/निष्ठया साकं स्वाध्यायपरिषेवा, संरक्षणाय अध्यनस्य/प्रशिक्षणस्य/नियत-वृत्तिसम्बन्धीयाभ्युन्नतेः प्रमाणानि, प्रत्येकं क्षेत्रे माने च शिक्षकाणाम् आन्तर्जालिकाभ्युन्नतेरुत्पादनम् शिक्षकाणां बोधस्य बृहत्परिसरकरणाय। यान्त्रिकतया शिक्षकाणां भिन्नयोगक्षेमात्मकानां प्राप्ताङ्कानां तथा अग्रगतेः समृद्धिः, स्व-मूल्याङ्कनोपकरणानि, शिक्षकविषयकलेखप्रमाणमूलकतथ्यस्य अभ्युन्नतिः।

**राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य कार्यान्वयनं तन्त्रांशस्य च उपदेशनम्**

- राज्यस्तरे राष्ट्रियस्तरे च राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-मानस्य कार्यान्वयनार्थं निरन्तरमुपदेशनव्यवस्था।
- शिक्षकाणां निरन्तर-वृत्तिसम्बन्धीयाभ्युन्नतये मार्गानुसरणकः।
- शिक्षकाणां प्रशिक्षकाणाम् उपदेशनाय अङ्कीयमञ्चस्य निर्माणम्।
- निरन्तर-वृत्तिसम्बन्धीयाभ्युन्नतये स्वगतिमूलकपाठ्यक्रमः।
- आन्तर्जालिकाधारितं तथा प्रयुक्तिसमाश्रितम् अध्ययनस्य समाधानम्।
- राष्ट्रिय-निधानस्य उत्पादनम्।
- कार्यरत-शिक्षकाः।
- प्राक्-परिषेवक-शिक्षकाः
- अध्ययनस्य मार्गानुसरणस्य प्रमाणम्।

परियोजनायाः नियन्त्रणं तथा तथ्यवण्टनम्


अङ्कीयपरियोजना तथा सम्पर्कः

- लक्ष्यसंस्थाभिः/विशेषज्ञैः सह आशुसम्बन्धस्थापनाय अङ्कीय-सम्मेलनात्मक-मञ्चस्य निर्माणम्।

चित्रम् - ६, राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-माने राष्ट्रिय-शिक्षक-योग्यता-संस्थानस्य अङ्कीयविकाशस्य परिकल्पनाविषये चित्रोदाहरणम्।




चित्रम् - ७, अङ्कीय-प्रबन्धिकाविषये चित्रोदाहरणम्




चित्रम् - ८, कर्णधाराध्ययनव्यवहारविषये चित्रोदाहरणम्।

# व्यवहृतचित्रसूचिः


| क्रमिक-संख्या | Image | पृष्ठम् |
|---|---|---|
| १. | शिक्षकाणां प्रत्युत्पन्नताविषये चित्रोदाहरणम्, | ८ पृष्ठम् |
| २. | वृत्तिसम्बन्धीय-मानानि योग्यताविषये च चित्रोदाहरणम्, | १३ पृष्ठम् |
| ३. | मौलिकमूल्यबोधाः नीतिबोधाश्चेति विषये चित्रोदाहरणम्, | १४ पृष्ठम् |
| ४. | शिक्षा तथा अभ्यास-विषये च चित्रोदाहरणम्, | १५ पृष्ठम् |
| ५. | वृत्तिसम्बन्धीयायाः अग्रगतेः अभ्युन्नतेश्च विषये चित्रोदाहरणम्, | १५ पृष्ठम् |
| ६. | राष्ट्रिय-शिक्षकीय-वृत्तिसम्बन्धीय-माने राष्ट्रिय-शिक्षक-योग्यता-संस्थानस्य अङ्कीयविकाशस्य परिकल्पनाविषये चित्रोदाहरणम्, | ४१ पृष्ठम् |
| ७. | अङ्कीय-प्रबन्धिकाविषये चित्रोदाहरणम्, | ४२ पृष्ठम् |
| ८. | कर्णधाराध्ययनव्यवहारविषये चित्रोदाहरणम्, | ४२ पृष्ठम् |

# परिभाषा

| | |
|---|---|
| ACR | Annual Confidential Report (ACR) - वार्षिक-विश्वस्त-वार्ता |
| APR | Annual Performance Appraisal (APR)- वार्षिक-प्रदर्शन-मूल्यनिर्धारणम् |
| CPD | Continuous Professional Development (CPD ) - निरन्तर-वृत्तिसम्बन्धीय-विकाशः |
| DIET | District Institute of Education & Training (DIET) - जनपदीय-शिक्षा-प्रशिक्षण-संस्था |
| DPEP | District Primary Education Project (DPEP) - जनपदीय-प्राथमिक-शिक्षा-परियोजना |
| FLN | Foundational Literacy and Numeracy (FLN) - मौलिक-साक्षरता अङ्कज्ञानं च |
| GoI | Government of India (GoI) - भारत-सर्वकारः |
| ICT | Information and Communication Technology (ICT)- तथ्य-संवाद-शिल्पकला |
| INSET | Inservice Education and Training (INSET) - कर्मरत-शिक्षा-प्रशिक्षणौ |
| JNVS | Jawahar Navodaya Vidyalaya Samiti (JNVS) - जवाहर-नवोदय-विद्यालय-समितिः |
| KVS | Kendriya Vidyalaya Sangathan (KVS) - केन्द्रीय-विद्यालय-संस्थानम् |
| MoE | Ministry of Education (MoE) - शिक्षा-मन्त्रालयः |
| NCTE | National Council for Teacher Education (NCTE) -राष्ट्रियशिक्षकः शिक्षापरिषद् |
| NCERT | National Council of Educational Research & Training (NCERT)- राष्ट्रिय-शैक्षिकानुसंधानस्य प्रशिक्षणस्य च परिषद् |
| NCFTE | National Curriculum Framework for Teacher Education (NCFTE)- राष्ट्रिय-शिक्षक-प्रशिक्षण-पाठ्यक्रमरूपरेखा |
| NCTQ | National Centre for Teacher Quality (NCTQ) - राष्ट्रिय-शिक्षकीय-योग्यता-संस्थानम् |
| NEP 2020 | National Education Policy 2020 (NEP) 2020- राष्ट्रिय-शिक्षा-नीतिः २०२० |
| NIEPA | National Institute for Educational Planning and Administration (NIEPA)- राष्ट्रिय-शिक्षागतपरिकल्पनायाः कार्यनिर्वाहस्य च संस्था |
| NPST | NPST- राष्ट्रिय-शिक्षिकीय-वृत्तिसम्बन्धीय-मानम् |

| | |
|---|---|
| NMM | National Mission for Mentoring (NMM)- राष्ट्रिय-परामर्श-प्रतिशासनम् |
| PI | Performance Indicator (PI) - प्रगति-सूचकः |
| PSTE | Pre-service Teacher Education (PSTE) - पूर्वकृतकार्य-शिक्षक-शिक्षणम् |
| RIE | Regional Institute of Education (RIE)- स्थानीय-शिक्षा-संस्था |
| RPL | Recognition of Prior Learning (RPL)- प्रधानशिक्षायाः प्रत्यभिज्ञानम् |
| RTE | Right to Education (RTE)- शिक्षाधिकारः |
| SCERT | State Council of Educational Research & Training (SCERT) - राज्य-शैक्षिकानुसंधानस्य प्रशिक्षणस्य च परिषद् |
| SSA | Sarva Shiksha Abhiyan (SSA) - सर्व-शिक्षा-अभियानम् |
| TEI | TEI - Teacher Education Institution (शिक्षक-प्रशिक्षण-संस्थानम्) |
| TEP | Teacher Education Programme (TEP) - शिक्षक-शिक्षण-कार्यक्रमः |
| TET | Teacher Eligibility Test (TET)- शिक्षक-योग्यता-परीक्षा |

# व्यवहृतग्रन्थसूचिः


- Australian Institute for Teaching and School Leadership. (2018). Australian ProfessionalStandards for Teachers.

  https: /www.aitsl.edu.au/docs/default-source/national-policy-framework/australian- professional-standards-for-teachers.pdf

- Department of Education. (2021). Teachers' Standards: Guidance for School Leaders,School Staffand GoverningBodies.

  https://assets.publishing.service.gov.uk/government/uploads/system/uploads/attachme nt_data/file/1040274/Teachers_Standards_Dec_2021.pdf

- Education International and UNESCO. (2019). Global Framework of Professional TeachingStandards.

  https://issuu.com/educationinternational/docs/2019_ei-unesco_framework

- Government of India (2020a). National Education Policy 2020.

  https://www.education.gov.in/sites/upload_files/mhrd/files/NEP_Final_English_0.pdf

- Government of India. (2022b). The constitution of India.

  https: /cdnbbsr.s3waas.gov.in/s380537a945c7aaa788ccfcdf1b99b5d8f/uploads/2023/05/2023050195.pdf

- National Commission on Teachers. (1986). The Teacher and Society: Report of theNational CommissiononTeachers-I.

- National Council for Teacher Education. (2009). National Curriculum Framework forTeacher Education.NewDelhi:NCTE.

- National Council of Educational Research and Training. (2005). National CurriculumFramework2005. NCERT.

- National Council of Educational Research and Training. (2019). Teacher's Self-Assessment. https://ncert.nic.in/pdf/announcement/TSAR.pdf

- National Qualifications Authority. (2021). Teacher Standards for the UAE.

  https://tls.moe.gov.ae/Downloads/SNSC%20standards%20teachers%20English.pdf

- The Right to Free and Compulsory Education Act. (2009). (Gazette Extraordinary),MinistryofLawand Justice,GovernmentofIndia,NewDelhi.

  https: /righttoeducation.in/sites/default/files/Right%20of%20Children%20to%20Free

  %20and%20Compulsory%20Education%20Act%202009%20(English).pdf

- Verma, J.S. (2013). Report of the Committee on Amendments to Criminal Law, 2013. NewDelhi.

  https://adrindia.org/sites/default/files/Justice_Verma_Amendmenttocriminallaw_Jan2013.pdf

By e-mail / Hand / Speed Post / Fax

**NCTE-Acad013/2/2021-O/o US(Acad.)-HQ** 31st August 2021

**OFFICE ORDER (Revised)**

It is decided to constitute a committee of the following members on National Professional Standards for Teachers (NPST) within NCTE. The committee would examine the relevance of para 5.20 of NEP 2020 and devise an appropriate strategy for developing & designing a National document on NPST.

| Sl. No. | Name & Address | Designation |
|---|---|---|
| 1. | Prof. CK Saluja, (Rtd). CIE, DU. New Delhi, | Chair |
| 2. | Prof. Anil Kumar Shukla. VC. KMCL University. Lucknow, UP | Member |
| 3. | Dr. Shakila T Shamshu. former OSD. DONE. MoE. New Delhi | Member |
| 4. | Prof Padma Sarangpani, TISS. Maharashtra | Member |
| 5. | Prof. Ranjana Arora, NCERT, New Delhi | Member |
| 6. | Prof K Ramchandran (Rdt) NIEPA. New Delhi | Member |
| 7. | Dr. Vishwajit Saha, Director CBSE. New Delhi | Member |
| 8. | Dr. Robin Chetri, SCERT, Gangtok, Sikkim | Member |
| 9. | Ms. Ramya Vcnkatraman. CENTA, Bangalore, Karnataka | Member |
| 10. | Shri. D K Chaturvedi, Under Secretary. NCTE. New Delhi | Convener |
| 11. | Dr. Parul. Senior Academic Consultant, NCTE, New Delhi | Co-convener |

2. Terms of Reference: -

i. Formulation of pragmatic aspects of the policy of NEP on NPST and Cross linking.

ii. Evolving guideline for the establishment of National Centre for Teachers Quality (NCTQ) under NPST at NCTE lig.. New Delhi.

iii. Structured plan of Action on Implementation of NPST and State grading formula.

iv. Review of data of digital consultations institutional consultation on NPST and developing strategy for National/ State level consultation for preparing this national document.

v. There are many countries which have the mechanism of National Professional Standards for Teachers (NPST). Mapping of NPST of these and some other countries and Development& Design of a draft framework on NPST.

vi. Extensive review of the inputs collected during the consultation period across the country will be done by the expert committee.

Cont. Pg 2/-

vii. The committee will then undertake a review of the areas of the teacher activities requiring common/current competency level of teachers. The committee will finally formulate the draft going through the several revisions before the NPST Draft is released for public review. Comments by the reviewers from amongst the stakeholders will then be used to prepare a final draft for notification.

viii. Preparation of a Self-Development Guide/Assessment Tools on NPST will also be designed for successful implementation of NPST. This will also include the teacher's professional role and responsibility in terms of quality because of the teacher's growing role beyond the classroom, achievement of standards as well underlying teachers's participation in decision to the education matter at the school/district/sale/national level.

ix. Ensuing Completion of all tasks within 3 months, so as to implement NPST from Academic Session 2022-23.

x. Any other point found relevant to NPST implemention as per the directive of NEP 2020.

xi. To hold discussion/meeting with other stakeholders whenever necessary. The Committee may consult/co-opt teachers / Principals/ Experts as when required.

xii. TA/DA/Sitting fees shall be paid as per the NCTE Rules. The NCTE would provide the secretarial assistance as per requirement.

3. This has approval of the competent authority.

**(Kesang Y. Sherpa)**
**Member Secretary**

Copy to-

1) PS to CP for information please.

2) Deputy Secretary/Under Secretary, GA/Academic/Accounts/EDP, NCTE.

3) Copy to all concerned.

4) Guard file.

सर्वाधिकारः
आलेखनमिदं समग्रप्रगतिश्च राष्ट्रिय-शिक्षक-प्रशिक्षण-परिषदः सम्पत्तिः तथा सर्वाधिकाररूपेण संरक्षितम् ।

सर्वस्वत्वाधिकारः संरक्षितः

Language consultancy and translation facilitated by
**National Translation Mission**
Central Institute of Indian Languages, Mysore

गुरूर्गुरूतमो धाम
NCTE

## राष्ट्रियशिक्षक-शिक्षापरिषदा
### भारत-शासनाधीनस्य एकं संविधिबद्धरूपम्
## National Council for Teacher Education
(A Statutory Body of the Government of India)